Ajita Prabhācārya
Shāntināthacaritram

UNIVERSITY OF TORONTO
3 1761 00382029 7

BL
1373
S45A6
1909
v.1

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL
NEW SERIES, No. 1200.



श्रीशान्तिनाथचरित्रम् ।

ÇRĪ ÇĀNTINĀTHA ÇARITRA

BY

ÇRĪ AJITA PRABHĀCĀRYA.

EDITED BY

MUNI INDRAVIJAYA

DISCIPLE OF

ÇĀSTRA VIÇĀRADA JAINĀCĀRYA

ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS I.

Calcutta:
PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.
1909.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,

11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

•Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	Rs.	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each		1	14
*Agni Purāṇa, Fasc. 3-14 @ /10/ each		7	8
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each		14	6
Aitereya Lochana.		2	0
•Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each		2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-		1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each		3	12
*Atharvana Upanishad, Fasc 3-5 @ /10/ each		1	14
Atmatattaviveka, Fasc. I. @ /10/ each		0	10
Aśvavaidyaka, Fasc. 1-5 @ /10/ each		3	2
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-6 ; Vol. II. Fasc. 1-5 @ 1/ each...		11	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-3 @ 1/ each		3	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each		1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc. 1 @ /10/ each ...		2	8
*Bhāmati, Fasc. 4-8 @ /10/ each		3	2
Bhāṭṭa Dipikā Vol. I, Fasc. 1-5 @ /10 each		3	2
Brahma Sutra, Fasc. 1 @ /10/ each		0	10
Bṛhaddēvatā Fasc. 1-4 @ /10/ each		2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each		3	12
Bodhisaryāvatāra of Cāntideva, Fasc. 1-5 @ /10/ each		3	2
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each		1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each		14	6
Ditto Vol. 6, Fasc. 7		1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-12 @ /10/ each		7	8
*Caturvarga Chintāmani, Vol. II, Fasc. 1-25 ; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol IV. Fasc. 1-6 @ /10/ each		36	14
Ditto Vol. 4. Fasc. 7		1	4
Clockavartika, (English) Fasc. 1-6 @ 1/4/ each		7	8
•Çrauta Sūtra of Āpastamba, Fasc. 9-17 @ /10/ each		5	10
Ditto Çānkhāyana, Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /10/ each ; Vol 4, Fasc. 1		10	0
Çri Bhāshyam, Fasc 1-3 @ /10/ each		1	14
Dāna Kriyā kaumudī, Fasc. 1-2 @ /10/ each		1	4
Gadadhara Paddhati Kālasāra Vol. 1, Fasc. 1-7 @ /10/ each		4	6
Ditto Āchārasārah Vols. II, Fasc. 1-3 @ /10/ each ..		1	14
Gobhiliya Grihya Sutra, Fasc. 4-12 @ /10/ each		5	10
Ditto Vol. II. Fasc. 1		1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each		4	6
Kātantra, Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each		17	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each		3	
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each		3	
*Lalitavistara. Fasc. 3-6 @ /10/ each			
Madana Pārijāta, Fasc. 1-11 @ /10/ each			
Mahā-bhāsya-pradipōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III Fasc. 1-6 @ /10/ each			
Manushyā Sangraha, Fasc. 1-3 @ /10/ each ...			

LIBRARY
AUG 21 1968
UNIVERSITY OF TORONTO
BL
1373
S45A
1909
V.1

अर्हम् ।

श्रीधर्मविजयगुरुभ्योनमः ।

श्रीअजितप्रभाचार्यविरचितम् ।

श्रीशान्तिनाथचरित्रम् ।

श्रेयोरत्नाकरोद्भूतामर्हल्लक्ष्मीमुपास्महे ।
स्पृहयन्ति न के यस्यै शेषश्रीविरताशयाः ॥ १ ॥
हर्षेण भाति यो ब्रह्मकृता लक्ष्मगतेन वा ।
हृत्यन्वर्थाय तस्मै [1]श्रीऋषभस्वामिने नमः ॥ २ ॥
येऽन्तरङ्गारिषड्वर्गोपसर्गोग्रपरीषहैः ।
न जितास्तेऽजितस्वामिमुख्या नन्दन्तु तीर्थपाः ॥ ३ ॥
कृतारिष्टतमःशान्तिश्चारुहेमतनुद्युतिः ।
प्रत्यादिष्टभवभ्रान्तिः श्रीशान्तिर्जयताज्जिनः ॥ ४ ॥
[2]ऋद्धिव्रतोपमा यस्य भवाः श्रोतृशुभावहाः ।
शान्तिनाथस्य तस्यैव चरित्रं कीर्त्तयाम्यहम् ॥ ५ ॥
जम्बूद्वीपस्य भरते क्षेत्रेऽत्रैव हि पत्तनम् ।
अस्ति रत्नपुरं नाम नररत्ननिवासभूः ॥ ६ ॥

---

(१) ख घ श्रीऋषभ-।
(२) घ ऋद्धिव्रतमिताः ।

आसीद्दासीकृतारातिश्चारुनीतिर्महामतिः ।
रूपलक्ष्म्या [1]रतिपतिः श्रीषेणस्तत्र भूपतिः ॥ ७ ॥
दानमानप्रियालापैः सदा तेनाभिनन्दिता ।
तस्याभिनन्दिता राज्ञी द्वितीया सिंहनन्दिता ॥ ८ ॥
सा पूर्वप्रेयसी राज्ञ ऋतुस्नानाभिनन्दिता ।
समधातुः शयनीये सुखसुप्ताऽन्यदा निशि ॥ ९ ॥
स्वप्नेऽपश्यन्निजोत्सङ्गवर्त्तिनौ भानुमालिनौ ।
प्रध्वंसितान्धतमसौ सूर्याचन्द्रमसौ समम् ॥ १० ॥ (युग्मम्)
कथयामास सा भर्त्तुस्तं स्वप्नं मुदिता प्रगे ।
तत्फलं सोऽपि विज्ञाय शशंसैवं प्रसन्नवाक् ॥ ११ ॥
युग्मजातौ भुवि ख्यातौ कुलोद्द्योतविधायिनौ ।
स्वप्नेनानेन हे देवि तव पुत्रौ भविष्यतः ॥ १२ ॥
बिभ्रत्युभावथो गर्भौ सा राज्ञी शुशुभेऽधिकम् ।
उपकर्तृकृतज्ञौ हि दधानेव वसुन्धरा ॥ १३ ॥
सम्पूर्णसमये साऽथ सुषुवे तनयद्वयम् ।
विधिप्रयुक्ता सन्नीतिरर्थधर्म्माविवावनौ ॥ १४ ॥
इन्दुषेणबिन्दुषेण इति नाम्नी तयोः शुभे ।
चकार तत्पिता हृष्टो महोत्सवपुरःसरम् ॥ १५ ॥
अष्टवर्षप्रमाणौ तौ कलाचार्यस्य सन्निधौ ।
कलाभ्यासं विदधतुः क्रमात्प्राप्तौ च यौवनम् ॥ १६ ॥

---

(१) क रतिपतिस्तत्र श्रीषेणभूपतिः ।

इतश्चाचैव भरते देशे मगधनामनि ।
श्रियाऽभिरामः सद्ग्रामोऽस्त्यचलग्राम[1]नामकः ॥ १७ ॥
तत्राभूद्ररणिजटाभिधानो द्विजपुङ्गवः ।
वेदवेदाङ्गतत्त्वज्ञो यशोभद्रा च तत्प्रिया ॥ १८ ॥
स नन्दिभूतिश्रीभूती यशोभद्राभवौ सुतौ ।
यत्नतः पाठयामास वेदशास्त्रमहर्निशम् ॥ १९ ॥
दास्या कपिलया जातः कपिलोऽप्यस्य नन्दनः ।
स तु जातिविहीनत्वादतिप्रज्ञाधिकोऽभवत् ॥ २० ॥
स्वपित्रा पाठ्यमानो तौ शृण्वानः कपिलोऽथ सः ।
जज्ञे चतुर्दशविद्यास्थानविज्ञानकोविदः ॥ २१ ॥
गृहान्निसृत्य यज्ञोपवीतयुग्मं वहंस्ततः ।
महाब्राह्मणमात्मानं मन्यमानोऽभ्रमद्भुवि ॥ २२ ॥
स आययौ रत्नपुरे सत्यकिर्नाम तत्र च ।
उपाध्यायो बहून् छात्रान् वेदपाठमकारयत् ॥ २३ ॥
पप्रच्छ कपिलश्छात्रान् वेदोपनिषदं तथा ।
यथा नोत्तरमेतस्मै दातुमीशा इमे ऽभवन् ॥ २४ ॥
विज्ञाय तं महाप्राज्ञमुपाध्यायो निजे पदे ।
स्थापयामास को नाम गुणैर्न लभते पदम् ॥ २५ ॥
उपाध्यायस्य तस्यासीज्जम्बुका नाम गेहिनी ।
तत्कुक्षिसम्भवा पुत्री सत्यभामाऽभिधा तथा ॥ २६ ॥

---

(१) ग -संज्ञकः ।

योग्योऽयमिति तां तस्मा उपाध्यायो ददौ सुताम् ।
रममाणस्तया सार्द्धं तत्रास्थात्कपिलः सुखम् ॥ २७ ॥
उपाध्यायस्य मान्योऽयमिति लोकैरपूज्यत ।
विद्वत्कथासु सर्वत्र क्रियते स्म निदर्शनम् ॥ २८ ॥
जगज्जीवातुधान्यौघत्राणद्वद्विविधानतः ।
परिरक्षितदुष्कालो वर्षाकालोऽन्यदाऽभवत् ॥ २९ ॥
तस्मिंश्च समयेऽन्येद्युः कौतुकी कपिलो ययौ ।
रात्रौ प्रेक्षणकालोकक्षुते देवकुलादिषु ॥ ३० ॥
महत्यामथ यामिन्यामन्धकारे निरन्तरे ।
वर्षत्यम्बुधरे गेहमागच्छन् [1]स व्यचिन्तयत् ॥ ३१ ॥
मार्गो निःसञ्चरस्तावत्तमसाऽन्तरितेक्षणम् ।
विश्वं प्रवर्त्तते तत्किं वस्त्रे आर्द्रीकरोम्यहम् ॥ ३२ ॥
विचिन्त्येदमथो कक्षान्तरे प्रक्षिप्य वाससी ।
स सत्वरमुपेयाय नग्नीभूतो निजे गृहे ॥ ३३ ॥
परिधाय ततो वस्त्रे प्रविवेश गृहान्तरे ।
तद्भार्या तं बभाषे ऽथ ढौकयित्वाऽन्यवाससी ॥ ३४ ॥
अग्रेतने जलक्लिन्ने मुञ्च त्वं नाथ चीवरे ।
इमे च परिधेहीति भणितः कपिलोऽब्रवीत् ॥ ३५ ॥
पश्य प्रिये नहि क्लिन्ने मन्त्रशक्त्या ममाम्बरे ।
करस्पर्शात्तत्प्रियाऽपि तं विवेद तथाविधे ॥ ३६ ॥

---

(१) क सोऽप्यचिन्तयत् ।

दृष्ट्वा च विद्युदुद्द्योतेनाङ्गमस्य जलार्द्रितम् ।
सैवं 'विचिन्तयामास सत्या दर्भाग्रतीक्ष्णधीः ॥ ३७ ॥
नूनं वृष्टिभयादेष गोपयित्वाऽम्बरे पथि ।
नग्न एव समायातो वृथाऽऽत्मानं प्रशंसति ॥ ३८ ॥
अनया चेष्टया नैष कुलीनोऽपि विभाव्यते ।
तदस्य गृहवासेन मम हन्त विडम्बना ॥ ३९ ॥
इत्यन्तश्चिन्तया मन्दरागा तस्मिन् बभूव सा ।
तथापि सममेतेन गृहवासमपालयत् ॥ ४० ॥
कपिलस्य पिता सोऽथ ब्राह्मणः कर्मदोषतः ।
बभूव विभवक्षीणो भूरिविद्याधनोऽपि सन् ॥ ४१ ॥
ज्ञात्वा विभूतिमन्तं तं कपिलं लोकपूजितम् ।
आगात्प्राघुणकोऽन्येद्युस्तद्गृहेऽसौ धनाशया ॥ ४२ ॥
भोजनावसरे सोऽथ विभिन्नः समुपाविशत् ।
कपिलो निजतातस्य व्यपदिश्य मिषान्तरम् ॥ ४३ ॥
ततस्तस्या विशेषेणाभवद्भ्रान्तिर्मनोगता ।
रहः पृष्टश्च विप्रोऽसौ तया शपथपूर्वकम् ॥ ४४ ॥
किमयं तात युष्माकमङ्गजो वा परो न्विति ।
तेनाऽपि सर्वमेतस्यै तदाख्यातं यथातथम् ॥ ४५ ॥
दत्त्वा यथोचितं किञ्चिद्विसृष्टः कपिलेन सः ।
विप्रो जगाम धरणिजटाख्यो नगरे निजे ॥ ४६ ॥

---

(१) क ह्रि चि- ।

विरक्ता सत्यभामा सा कपिलस्य गृहात्ततः ।
गत्वा श्रीषेणभूपालं कृताञ्जलिरथावदत् ॥ ४७ ॥
देव त्वं जगतीपालो लोकपालश्च पञ्चमः ।
दीनानाथाशरण्यानां सर्वेषां त्वं गतिः [1]किल ॥ ४८ ॥
ततः कुरुष्व कारुण्यं ममाप्युपरि भूपते ।
प्रत्यूचे पार्थिवस्तां हि किं ते दुःखस्य कारणम् ॥ ४९ ॥
पूज्यस्तावदुपाध्यायस्तस्य त्वमसि नन्दिनी ।
[2]गेहिनी कपिलस्यापि मान्यस्त्वत्पितुरेव यः ॥ ५० ॥
उवाच सत्यभामैवमस्ति राजन् परं मम ।
भर्त्ता यः कपिलो नाम सोऽकुलीनत्वदूषितः ॥ ५१ ॥
राज्ञाऽथ कथमित्युक्ता राज्ञोऽग्रे साऽपि सूनृताम् ।
तत्कथां कथयामास भूयश्चैवमभाषत ॥ ५२ ॥
अमुष्य गृहवासेन पर्याप्तं मम सर्वथा ।
तथा कुरु महीनाथ यथा शीलं चराम्यहम् ॥ ५३ ॥
आकार्य भूभुजाऽभाणि साञ्जसं कपिलोऽथ सः ।
विरक्ता गृहवासस्य भद्रेयं त्वत्प्रियेत्यलम् ॥ ५४ ॥
तदिमां विगतस्नेहां मुञ्च त्वं स्वपरिग्रहात् ।
यथाऽसौ पितृगेहस्था कुर्याद्धर्मं कुलोचितम् ॥ ५५ ॥
कपिलोऽप्यब्रवीद्देव क्षणमप्यनया विना ।
न स्थातुमहमीशोऽस्मि तदियं मुच्यते कथम् ॥ ५६ ॥

---

(१) घ प्रभो ।
(२) घ गृहिणी ।

राज्ञा तु सत्यभामा सा पुनः पृष्टाऽब्रवीदिति ।
नैतस्माद्यदि मे मोक्षस्तन्मरिष्यामि निश्चितम् ॥ ५७ ॥
राज्ञोचे कपिलो भूयो हंहो धृत्वा बलादमूम् ।
स्त्रीहत्यां किं करोषि त्वं किं बिभेषि न पापतः ॥ ५८ ॥
अस्मद्राज्ञीसमीपस्था तिष्ठत्वेषा यथासुखम् ।
दिनानि कत्यपीत्युक्तो मेनेऽसौ कपिलोऽपि तत् ॥ ५९ ॥
सत्यभामा विनीता सा कुर्वाणा शीलरक्षणम् ।
राजराज्ञीसमीपस्था गमयामास वासरान् ॥ ६० ॥
सूरिर्विमलबोधाख्यो विहरन्नवनीतले ।
तत्रागत्य पुरेऽन्येद्युस्तस्थौ स्थाने यथोचिते ॥ ६१ ॥
सूरेरागमनोदन्तमाकर्ण्य जनतामुखात् ।
ययौ तद्वन्दनाहेतोः श्रीषेणपृथिवीपतिः ॥ ६२ ॥
सूरिं नत्वा यथास्थानमुपाविक्षन्महीपतिः ।
तमुद्दिश्य मुनीन्द्रोऽथ विदधे धर्मदेशनाम् ॥ ६३ ॥
मनुष्यकादिसामग्रीं सम्प्राप्यापि प्रमादिनः ।
ये धर्मं नानुतिष्ठन्ति तेषां जन्म निरर्थकम् ॥ ६४ ॥
जैनं धर्मं समाराध्य भूत्वा विभवभाजनम् ।
प्राप्ताः सिद्धिसुखं ये ते श्लाघ्या मङ्गलकुम्भवत् ॥ ६५ ॥

तद्यथा—

उज्जयिन्यां महापुर्यां वैरिसिंहो महीपतिः ।
सोमचन्द्रा च तद्भार्या धनदत्तश्च श्रेष्ठ्यभूत् ॥ ६६ ॥

---

(१) क घ ङ अथ तत् ।

धर्मार्थी सुविनीतात्मा सत्यशीलदयान्वितः ।
गुरुदेवार्चनप्रीतः स श्रेष्ठी धनदत्तकः ॥ ६७ ॥
सत्यभामेति तद्भार्या शीलालङ्कृतिशालिनी ।
पत्यौ प्रेमपरा किं त्वपत्यभाग्यविवर्जिता ॥ ६८ ॥
साऽन्यदा श्रेष्ठिनं पुत्रचिन्ताम्लानमुखाम्बुजम् ।
दृष्ट्वा पप्रच्छ हे नाथ किं ते दुःखस्य कारणम् ॥ ६९ ॥
श्रेष्ठिना च समाख्याते तस्यै तस्मिन् यथातथे ।
श्रेष्ठिनी पुनरप्यूचे पर्याप्तं चिन्तयाऽनया ॥ ७० ॥
धर्म एव भवेन्नृणामिहामुत्र सुखप्रदः ।
स एव सेवनीयो हि विशेषेण सुखैषिणा ॥ ७१ ॥
तत्त्वं देवे गुरौ चापि कुरु भक्तिं यथोचिताम् ।
देहि दानं सुपात्रेभ्यः [1]पुस्तकं चापि लेखय ॥ ७२ ॥
एवं च कुर्वतोः पुत्रो भावी यदि तदा वरम् ।
भविता निर्मलो नाथ परलोकोऽन्यथाऽऽवयोः ॥ ७३ ॥
हृष्टः श्रेष्ठ्यप्युवाचैवं प्रिये साधूदितं त्वया ।
सम्यगाराधितो धर्मो भवेच्चिन्तामणिर्नृणाम् ॥ ७४ ॥
ततश्च देवपूजार्थं पुष्पग्रहणहेतवे ।
आकार्यारामिकं तस्मै ददौ श्रेष्ठी धनं बहु ॥ ७५ ॥
स्वयं गत्वा तदारामे पुष्पाण्यानीय स प्रगे ।
गृहार्चामर्चयित्वा च गच्छति स्म जिनालये ॥ ७६ ॥

---

(१) ग ङः पुस्तकांश्चापि ।

तत्र नैषेधिकीमुख्यान् यथास्थानं दशत्रिकान् ।
ख्यापयन् परया भक्त्या विदधे चैत्यवन्दनाम् ॥ ७७ ॥
ततः साधूनमस्कृत्य प्रत्याख्यानं विधाय च ।
अतिथीनां संविभागं चकार च महामतिः ॥ ७८ ॥
अन्यदप्यखिलं धर्म्मकर्म शर्मनिबन्धनम् ।
आह्निकं रात्रिकं चैव धनदत्तो व्यधात्सुधीः ॥ ७९ ॥
अथ धर्म्मप्रभावेन तुष्टा शासनदेवता ।
ददौ तस्मै पुत्रवरं प्रत्यक्षीभूय साऽन्यदा ॥ ८० ॥
पुत्रे गर्भागते रात्रिशेषे श्रेष्ठिन्युदैक्षत ।
स्वप्ने हेममयं पूर्णकलशं मङ्गलाह्वतम् ॥ ८१ ॥
जातश्च समये पुत्रस्ततः कृत्वोत्सवं गुरुम् ।
तस्मै मङ्गलकलश इत्याख्यां तत्पिता ददौ ॥ ८२ ॥
कलाभ्यासपरः सोऽथाष्टवर्षप्रमितोऽन्यदा ।
तात त्वं कुत्र यासीति पप्रच्छ पितरं निजम् ॥ ८३ ॥
सोऽवदद्वत्स गत्वाहमारामे प्रतिवासरम् ।
ततः पुष्पाणि चानीय करोमि जिनपूजनम् ॥ ८४ ॥
ययौ पित्रा सहान्येद्युस्तत्र सोऽपि कुतूहली ।
आरामिकोऽवदत्कोऽयं बालो नेत्रविशालकः ॥ ८५ ॥
ज्ञात्वा च श्रेष्ठिपुत्रं तं तस्मै सोऽपि ददौ मुदा ।
नारङ्गकरुणादीनि सुस्वादूनि फलान्यलम्[१] ॥ ८६ ॥

---

(१) क फलान्यपि ।

स्वगेहे पुनरागत्य कुर्वतो जिनपूजनम् ।
श्रेष्ठिनोऽढौकयत्सुचः पूजोपकरणं स्वयम् ॥ ८७ ॥
द्वितीये च दिने तेन सादरं भणितः पिता ।
अतः परं मया गम्यं पुष्पानयनकर्मणि ॥ ८८ ॥
निश्चिन्तेनैव स्थातव्यं त्वया तात निजे गृहे ।
अत्याग्रहेण तद्वाक्यमनुमेने पितापि तत् ॥ ८९ ॥
एवं च कुर्वतस्तस्य धर्माभ्यासं तथान्तरा ।
कियत्यपि गते काले यज्जातं तन्निशम्यताम् ॥ ९० ॥
अस्त्यत्र भरतक्षेत्रे चम्पा नाम महापुरी ।
अभूत्तत्र महाबाहुः पार्थिवः सुरसुन्दरः ॥ ९१ ॥
राज्ञो गुणावली तस्य सा निजोत्सङ्गवर्त्तिनीम् ।
दृष्ट्वा कल्पलतां स्वप्ने पार्थिवाय न्यवेदयत् ॥ ९२ ॥
राजा प्रोवाच हे देवि तव पुत्री भविष्यति ।
सर्वलक्षणसम्पूर्णा सर्वनारीशिरोमणिः ॥ ९३ ॥
पूर्णकाले [1]च चार्वङ्गी सा देवी सुषुवे सुताम् ।
त्रैलोक्यसुन्दरी नाम तस्याश्चक्रे महीपतिः ॥ ९४ ॥
लावण्यधनमञ्जूषा सौभाग्यरसनिम्नगा ।
बभूव यौवनप्राप्ता सा मूर्त्तेव सुराङ्गना ॥ ९५ ॥
तां विलोक्यानवद्याङ्गीं दध्याविति [2]धराधिपः ।
रमणः कोऽनुरूपोऽस्या [3]वत्साया मे भविष्यति ॥ ९६ ॥

---

(१) ख ग घ ङ्थ ।
(२) ग घ ङ धरापतिः ।
(३) ख वत्सायाः को । घ वत्सायाः क ।

ऊचे च प्रेयसीः सर्वा वराहैवं सुताऽभवत् ।
दातव्या ब्रूत तत् कस्मा अत्रार्थे वः प्रधानता ॥ ९७ ॥
ता ऊचुरियमस्माकं जीविताद्पि वल्लभा ।
नालं धर्त्तुं वयं प्राणान् क्षणमप्यनया विना ॥ ९८ ॥
दातव्या तदसौ मन्त्रिपुत्रायात्रैव हे प्रिय ।
प्रत्यहं नयनानन्दकारिणी दृश्यते यथा ॥ ९९ ॥
ततो राज्ञा समाहूय सुबुद्धिः सचिवो निजः ।
अभाणि यन्मया दत्ता त्वत्सुतायात्मसुन्दरी[1] ॥ १०० ॥
अमात्योऽप्यवदद्देव किमयुक्तं ब्रवीष्यदः ।
कस्मैचिद्राजपुत्राय दातुं कन्या स्वोचिता ॥ १ ॥
राज्ञोचे न त्वया वाच्यमित्यर्थे किञ्चनापि भोः ।
देया त्वत्सूनवेऽवश्यं पुत्री त्रैलोक्यसुन्दरी ॥ २ ॥
मन्त्री कृतावहित्थोऽथ गृहे गत्वा व्यचिन्तयत् ।
हा व्याघ्रदुस्तटीन्याये पतितोऽस्मि करोमि किम् ॥ ३ ॥
रतिरूपोपमाकारा राज्ञः पुत्री सुतस्तु मे ।
कुष्ठी तदेतयोर्योगं कथं जानन् करोमि किम् ॥ ४ ॥
अथवाऽयं मयोपायो लब्धो यत्कुलदेवताम् ।
आराध्य साधयिष्यामि सर्वमात्मसमीहितम् ॥ ५ ॥
ततश्चाराधयामास विधिना कुलदेवताम् ।
उवाच साऽपि[2] प्रत्यक्षीभूय मन्त्रिन् स्मृताऽस्मि किम् ॥ ६ ॥

---

(१) ग घ -नन्दिनी । (२) घ -प्यब्रवीद्देव । (३) घ सा च ।

मन्त्रूचे त्वं स्वयं वेत्सि सर्वं दुःखस्य कारणम् ।
तथा कुरु यथा पुत्रो नीरोगाङ्गो भवेन्मम ॥ ७ ॥
देव्यूचे नान्यथाकर्त्तुं नृणां कर्म पुराकृतम् ।
दैवतैरपि शक्येत हृथेयं प्रार्थना तव ॥ ८ ॥
मन्त्री प्रोवाच यद्येवं तदन्यमपि पूरुषम् ।
तदाकारं निराकल्यं कुतोऽप्यानीय मेऽर्पय ॥ ९ ॥
तेनोद्वाह्य महाराजपुत्रीं कमललोचनाम् ।
अर्पयिष्यामि पुत्रस्य करिष्येऽस्य यथोचितम् ॥ १० ॥
[1]देवतोचे पुरीद्वारि ऽश्वरत्नकनरान्तिके ।
शीतव्यथानिरासार्थं अग्निसेवापरो हि यः ॥ ११ ॥
कुतोऽप्यानीय मयका मुक्तो भवति बालकः ।
स मन्त्रिन् भवता ग्राह्यः पश्चात्कुर्य्याद्यथोचितम् ॥ १२ ॥
(युग्मम्)
इत्युक्त्वाऽन्तर्दधे देवी हृष्टोऽथ सचिवेश्वरः ।
सर्वां विवाहसामग्रीं प्रगुणीकुरुते स्म सः ॥ १३ ॥
अश्वपालनरं क्षत्रमाकार्य निजकं ततः ।
तस्मै निवेद्य सकलं वृत्तान्तं सत्यमादितः ॥ १४ ॥
इदमूचे च यः कश्चिदभ्येति भवदन्तिके ।
कुतोऽपि बालकः सो हि समर्प्यो मेऽविलम्बितम् ॥ १५ ॥
तं श्रेष्ठिनन्दनं तस्या वरं विज्ञाय भाविनम् ।
उज्जयिन्यां ययौ पुर्यां मन्त्रिणः कुलदेवता ॥ १६ ॥

---

(१) घ देव्युवाच ।

अन्तरिक्षस्थितोवाच सा चैवं तस्य शृण्वतः ।
पुष्पाण्यानीय चारामाद्गच्छतो निजवेश्मनि ॥ १७ ॥
स एष बालको याति पुष्पभाजनपाणिकः ।
परिणेष्यति यो राजकन्यकां भाटकेन हि ॥ १८ ॥
तच्छ्रुत्वा विस्मितः सोऽथ किमेतदिति सम्भ्रमात् ।
तातस्य कथयिष्यामीति ध्यायन् सदनं ययौ ॥ १९ ॥
गृहं गतस्य सा वाणी विस्मृता तस्य दैवतो ।
द्वितीये दिवसेऽप्येवं श्रुत्वा पुनरचिन्तयत् ॥ २० ।
अहो अद्यैव सा वाणी या श्रुता ह्यो मयाऽम्बरे ।
तदद्य सदनं प्राप्तः कथयिष्याम्यहं पितुः ॥ २१ ॥
सोऽचिन्तयदिदं यावत्तावदुत्पाद्य वात्यया ।
नीतो दूरतरारण्ये चम्पापुर्याः समीपगे ॥ २२ ॥
भयभ्रान्तस्तृषाक्रान्तः श्रान्तस्तत्र स बालकः ।
सन्मानसभ्रमकरं ददर्शाग्रे सरोवरम् ॥ २३ ॥
तत्र वस्त्राञ्चलापूतं पयः पीत्वाऽतिशीतलम् ।
तत्केतुस्कन्धसंरूढमाश्रिश्राय वटद्रुमम् ॥ २४ ॥
तदा चास्तमितो भानुरवस्थापतितस्य हि ।
श्रेष्ठिपुत्रस्य तस्योपकारं कर्त्तुमिवाक्षमः ॥ २५ ॥
कृत्वा दर्भतृणैरज्जुं तयाऽऽरुह्य च तं द्रुमम् ।
स ददर्शोत्तराशायामदूरे ज्वलितानलम् ॥ २६ ॥

---

(१) ख ङ अद्यापि ।

ततो वटात्समुत्तीर्य स भीतः शीतविह्वलः ।
हुताशनानुसारेण चम्मापुर्यां ययौ बहिः ॥ २७ ॥
तत्रोपान्तेऽश्वपालानां कुर्व्वाणो वह्निसेवनम् ।
यावदासीदसौ हस्यमानस्तैर्दुष्टचेष्टितैः ॥ २८ ॥
तावत्तेन [1]नरेणैत्य पूर्वादिष्टेन मन्त्रिणा ।
आत्मनः पार्श्वमानीतः कृतश्च निरुपद्रवः ॥ २९ ॥
गोपयित्वाऽतियत्नेन प्रभातसमयेऽमुना ।
अर्पितोऽ[2]मात्यवर्गस्य गृहे नीत्वा सगौरवम् ॥ ३० ॥
भोजनाच्छादनप्रायममात्योऽप्यस्य गौरवम् ।
चकार सदनस्यान्तर्गोपनं च दिवानिशम् ॥ ३१ ॥
ततोऽसौ चिन्तयामास किमयं मम सत्क्रियाम् ।
कुरुते निर्गमं चैव यन्नाद्रचति मन्दिरात् ॥ ३२ ॥
पप्रच्छ चान्यदाऽमात्यं तात वैदेशिकस्य मे ।
किमिदं माननं हन्त भवद्भिः क्रियतेऽधिकम् ॥ ३३ ॥
का नामैषा पुरी को वा देशः को वाऽत्र भूपतिः ।
इति सत्यं ममाख्याहि विस्मयोऽत्र प्रवर्त्तते ॥ ३४ ॥
अमात्योऽप्यब्रवीच्चम्पानाम्नीयं नगरी वरा ।
अङ्गाभिधानो देशश्च राजात्र सुरसुन्दरः ॥ ३५ ॥
सुबुद्धिर्नाम तस्याहं माननीयो महत्तमः ।
मयाऽऽनीतोऽसि वत्स त्वं कारणेन गरीयसा ॥ ३६ ॥

---

(१) ख घ ङ नरेणैवं । (२) घ -मात्यवर्यस्य ।

त्रैलोक्यसुन्दरी नाम राज्ञा पुत्री विवाहितुम् ।
प्रदत्ता मम पुत्राय स तु कुष्ठेन पीडितः ॥ ३७ ॥
परिणीय त्वया भद्र विधिना सा नृपाङ्गजा ।
दातव्या मम पुत्राय तदर्थं त्वामिहानयम् ॥ ३८ ॥
तच्छ्रुत्वा मङ्गलो ऽवोचदकृत्यं किं करोष्यदः ।
क्व सा रूपवती बाला निन्द्यरोगी क्व ते सुतः ॥ ३९ ॥
कर्म्मेदं न करिष्यामि कथञ्चिदतिनिष्ठुरम् ।
कूपे क्षिप्त्वा जनं मुग्धं वरत्राकर्त्तनोपमम् ॥ ४० ॥
मन्त्र्यूचे चेन्न कर्म्मेदं करिष्यसि सुदुर्म्मते ।
तदा त्वां निजहस्तेन मारयिष्यामि निश्चितम् ॥ ४१ ॥
इति निस्त्रिंशमाकृष्य भणितोऽपि सुबुद्धिना ।
अकृत्यं नानुमेने तत् स कुलीनशिरोमणिः ॥ ४२ ॥
प्रधानपुरुषैर्मन्त्री निषिद्धस्तस्य मारणात् ।
अभाणि सोऽपि मन्यस्व भद्र त्वं मन्त्रिणो वचः ॥ ४३ ॥
ततोऽसौ चिन्तयामास भवितव्यमिदं खलु ।
अन्यथोज्जयिनी क्वाऽसौ ममेहागमनं क्व च ॥ ४४ ॥
इदमाकाशवाचाऽपि दैवत्या कथितं तदा ।
तत्करोम्यहमप्येवं यद्वाच्यं तद्भवत्यहो ॥ ४५ ॥
विचिन्त्येदं पुनः स्माह मङ्गलो मन्त्रिणं प्रति ।
यद्यवश्यमिदं कार्यं मयका कर्म्म निर्घृणम् ॥ ४६ ॥
तदाऽहमपि वः पार्श्वे नाथ नाथामि सर्वथा ।
मह्यं ददाति यद्राजा वस्तुजातं ममैव तत् ॥ ४७ ॥

स्थापनीयं [1]तु तत्सर्वमुज्झयित्वा: पुरोऽध्वनि ।
एवमस्त्विति तद्वाक्यं मेने मन्त्र्यपि बुद्धिमान् ॥ ४८ ॥
इति मङ्गलकुम्भोक्तं सचिव: प्रत्यपद्यत ।
सर्वं च सज्जयामास क्रमाद्दैवाह्निकं विधिम् ॥ ४९ ॥
अथ व्योम्न:प्रतिच्छन्दमिव मण्डपमुत्तमम् ।
आदेशकारकै: भूप: स्वानुरूपमकारयत् ॥ ५० ॥
कुमारक: कृतस्नान: कृतचन्दनलेपन: ।
सदशखेतवसनो हस्तविन्यस्तकङ्कण: ॥ ५१ ॥
दत्तकुङ्कुमहस्तोऽथ हस्त्यारूढो विभूषणै: ।
उत्तममेरुशृङ्गाग्ररूढकल्पद्रुमोपम: ॥ ५२ ॥
द्राघीयोभिर्वरस्त्रीणां जुलुध्वनिभिर्भृशम् ।
पञ्चस्वनैश्च विदधत् दिवं नादमयीमिव ॥ ५३ ॥
कृतशक्रधनुर्दण्डैर्मायूरातपवारणै: ।
वार्यमाणातप: प्राप मण्डपद्वारसन्निधिम् ॥ ५४ ॥
उत्तीर्य कुञ्जरात् तुङ्गात् कुलस्त्रीभि: कृतं तदा ।
अर्घमेष प्रतीयेष प्रद्योतन इव प्रगे ॥ ५५ ॥
समासन्ने ततो लग्ने हस्तिस्कन्धाधिरोपित: ।
स निन्ये भूपते: पार्श्वं वस्त्राभरणभूषित: ॥ ५६ ॥
त्रैलोक्यसुन्दरी साऽथ दृष्ट्वा तं मन्मथोपमम् ।
अमंस्त तद्वरप्राप्त्या कृतार्थं स्वं मनस्विनी ॥ ५७ ॥

---

(१) घ हि ।

ततश्च विप्रे पुण्याहं पुण्याहमिति जल्पति ।
चत्वारि परितो वह्निं भ्रेमतुर्मण्डलानि तौ ॥ ५८ ॥
प्रथमे मण्डले राजा चारुवस्त्राण्यनेकशः ।
वरायादाद् द्वितीये च स्थाला[1]भरणसञ्चयम् ॥ ५९ ॥
तृतीये मणिहेमादि चतुर्थे च रथादिकम् ।
जायापत्योस्तयोरित्थं जज्ञे पाणिग्रहोत्सवः ॥ ६० ॥
कृतोद्वाहे वरे चास्मिन् वधूहस्तममुञ्चति[2] ।
उवाच नृपतिर्भूयो वत्स यच्छामि किं नु[3] ते ॥ ६१ ॥
ततश्च याचितस्तेन जात्यघोटकपञ्चकम् ।
तत्तस्मै शीघ्रमेवासौ प्रददौ प्रीतमानसः ॥ ६२ ॥
वाद्यमाने ततस्तूर्येऽभवद्धवलमङ्गलः ।
मन्त्रिणा स्वगृहं नित्ये समं वध्वा स मङ्गलः ॥ ६३ ॥
तत्रामात्यगृहजनस्कन्नं क्षत्रमभाषत ।
कथं निर्वास्यतेऽद्यापि नायं वैदेशिको नरः ॥ ६४ ॥
त्रैलोक्यसुन्दरी साऽथ चलचित्तं निजं पतिम् ।
ज्ञात्वेङ्गितैस्ततस्तस्योपान्तं नैवामुचत् क्षणम् ॥ ६५ ॥
ततः क्षणान्तरेणासौ देहचिन्तार्थमुत्थितः ।
जलपात्रं गृहीत्वाऽऽशु तदनु प्राचलच्च सा ॥ ६६ ॥
कृतायामपि तस्यां तं शून्यचित्तं रहःस्थितम् ॥
उवाच प्रेयसी कान्त बाधते त्वां क्षुधा नु किम् ॥ ६७ ॥

---

(१) ख घ वस्त्रा- । (३) ङ, च ।
(२) ङ -हस्तं न मुञ्चति ।

ओमिति भणिते तेन दासीहस्तेन मोदकान् ।
आनाय्य स्वगृहात्तस्मै ददौ त्रैलोक्यसुन्दरी ॥ ६८ ॥
भुक्तेषु तेषु पानीयं पिबता तेन भाषितम् ।
अहो रम्यतरा एते मोदकाः सिंहकेसराः ॥ ६९ ॥
उज्जयिन्या नगर्याश्चेन्नीरमास्वाद्यतेऽमलम् ।
तदा तन्निर्भवेन्नूनं मोदकेष्वप्यितेष्वपि ॥ ७० ॥
तच्छ्रुत्वा राजपुत्री सा दध्यावाकुलचेतसा ।
अहो अघटमानं किं वाक्यमेष प्रजल्पति ॥ ७१ ॥
मातृगेहमथावल्यामार्यपुत्रस्य भावि वा ।
तदसौ दृष्टपूर्वत्वाज्जानात्यस्याः स्वरूपताम् ॥ ७२ ॥
ततश्च निजहस्तेन मुखपाटवकारणम् ।
पञ्चसौगन्धिकं तस्मै ताम्बूलं दत्तवत्यसौ ॥ ७३ ॥
सन्ध्याकाले पुनर्मन्त्रिमानुषैः प्रेषितोऽथ सः ।
त्रैलोक्यसुन्दरीमेवमूचे मतिमतां वरः ॥ ७४ ॥
गमिष्यामि पुनर्देहचिन्तायामुदरार्त्तिभाक् ।
त्वया क्षणान्तरेणागन्तव्यमादाय पुष्करम् ॥ ७५ ॥
निरगाच्च ततो मन्त्रिमन्दिरात्पुरुषांश्च तान् ।
पप्रच्छ राजदत्तं भोः कास्ति तद्दत्तु मामकम् ॥ ७६ ॥
तैश्च तद्दर्शितं सर्वमुज्जयिन्याः पथि स्थितम् ।
ततः सारतरं वस्तु निक्षिप्यैकरथे वरे ॥ ७७ ॥
तस्मिंश्च योजयित्वाऽश्वांश्चतुरः पृष्ठतस्तथा ।
बध्वैकं शेषकं वस्तु मुक्त्वा तत्रैव सोऽचलत् ॥७८॥ (युग्मम्)

पृष्टाश्चानेन ते ग्रामानुज्जयिन्यध्वगान्नराः[1] ।
प्रत्येकं कथयन्ति स्म नामग्राहं मुहुर्मुहुः ॥ ७९ ॥
ततो रथाधिरूढोऽसौ तेन मार्गेण बुद्धिमान् ।
स्तोकैरेव दिनैः प्राप्तस्तामेव नगरीं निजाम् ॥ ८० ॥
इतश्च पितरौ तस्य तमन्विष्य विलप्य च ।
बहुधा बहुभिर्धर्मैः गतशोकौ बभूवतुः ॥ ८१ ॥
गृहाभिमुखमायान्तं रथारूढं विलोक्य तम् ।
बभाषेऽथापरिज्ञाय जनन्यस्य ससम्भ्रमम् ॥ ८२ ॥
प्रेर्यते गृहमध्येन राजपुत्र कथं रथः ।
कर्त्तास्यभिनवं मार्गं किं त्वं त्यक्त्वा पुरातनम् ॥ ८३ ॥
इत्थं निषिध्यमानोऽपि न यावद्विरराम सः ।
आचख्यौ श्रेष्ठिनस्तावत् श्रेष्ठिन्याकुलिताशया ॥ ८४ ॥
श्रेष्ठाप्यस्य निषेधार्थं गृहाद्यावन्निरीयिवान् ।
तावद्रथात्समुत्तीर्य पितुः पादौ ननाम सः ॥ ८५ ॥
उपलक्ष्य ततस्ताभ्यामाश्लिष्टस्तनयो निजः ।
सद्यः प्रादुर्भवद्धर्षाऽश्रुपूरप्लावितेक्षणम् ॥ ८६ ॥
पप्रच्छ चोपविष्टः सन् वत्सर्द्धिः कुत ईदृशी ।
क्व वा कालमियन्तं त्वं स्थितोऽसि वद नन्दन ॥ ८७ ॥
ततश्चात्म[2]कथा तेन पितुरग्रे निवेदिता ।
याक्[3]श्रुत्यपहारादि स्वस्थानागमनावधि ॥ ८८ ॥

---

(१) ङ च छ -गा नराः । (३) घ वाचः ।
(२) ख घ तत आत्म- ।

अहो पुत्रस्य सौभाग्यमहो पुत्रस्य दक्षता ।
अहो धैर्यमहोभाग्यमिति प्राशंसतामिमौ ॥ ८८ ॥
ततः प्राकारसंगुप्तं[1] स स्वगेहमकारयत् ।
अश्वानां रक्षणार्थं च मन्दुरादिनियन्त्रणम् ॥ ८० ॥
सोऽन्येद्युर्जनकं स्माह मम तात कलागमः ।
स्वल्पोऽस्त्यद्यापि तं[2] पूर्णं करिष्यामि त्वदाज्ञया ॥ ८१ ॥
ततश्चानुमतः पित्रा कलाचार्यस्य सन्निधौ ।
कलाऽभ्यासं चकारासौ स्वकीयसदनान्तिके ॥ ८२ ॥
इतश्च मन्त्रिणा तेन रात्रौ मङ्गलवेषभृत् ।
प्रेषितो वासभवने वधूपान्ते सुतो निजः ॥ ८३ ॥
शय्यारूढं च तं दृष्ट्वा दध्यौ त्रैलोक्यसुन्दरी ।
कोऽयं कुष्ठाभिभूताङ्गः समायातो ममान्तिकम् ॥ ८४ ॥
करस्पर्शमथो कर्त्तुमुद्यतेऽस्मिन् झटित्यपि ।
सा शय्यायाः समुत्थाय निर्ययौ भवनाद्बहिः ॥ ८५ ॥
दासीभिर्भणिता किं नु स्वामिन्यसि ससम्भ्रमा ।
साऽवदद्देवतारूपी गतः क्वापि स मे पतिः ॥ ८६ ॥
प्रत्यूचुस्ता इदानीं स प्रविष्टोऽत्र पतिस्तव ।
साऽब्रवीन्नास्त्यसावत्र कुष्ठिकः कोऽपि विद्यते ॥ ८७ ॥
दासीमध्ये ततः सुप्ता तामतीत्य विभावरीम् ।
त्रैलोक्यसुन्दरी प्रातर्ययौ पितृगृहं निजम् ॥ ८८ ॥

---

(१) ग संयुक्तं ।
(२) ग सं ।

सुबुद्धिरपि दुर्बुद्धिः सोऽथ मन्त्री महीपतेः ।
ययौ सकाशमन्येद्युश्चिन्ताश्याममुखः किल ॥ ९९ ॥
कृतप्रणतिमासीनमथैनं पृथिवीपतिः ।
हर्षस्थाने विषादः किं तवेत्यूचे कृताग्रहः ॥ २०० ॥
स जगाद महाराज विचित्रा कर्मणां गतिः ।
अस्माकं मन्दभाग्यानां वशात्परिणता कथम् ॥ १ ॥
चिन्तयत्यन्यथा जीवो हर्षपूरितमानसः ।
विधिस्त्वेष महावैरी कुरुते कार्यमन्यथा ॥ २ ॥
राजा प्रोवाच हे मन्त्रिन् उक्ता स्वं दुःखकारणम् ।
मामप्यमुष्य दुःखस्य संविभागयुतं कुरु ॥ ३ ॥
निःश्वस्य सचिवोऽप्यूचे देव दैवं करोति तत् ।
यद्दुष्करमपि नो शक्यमश्रद्धेयं च मृषताम् ॥ ४ ॥
स्वामिपादैः सप्रसादैर्दत्ता सूनोर्ममात्मजा ।
तस्यां तु परिणीतायां यद्दत्तं तन्निशम्यताम् ॥ ५ ॥
यादृग् राज्ञा स्वयं दृष्टस्तादृगेव सुतो मम ।
अधुना कुष्ठरोगार्तो दृश्यते क्रियते नु किम् ॥ ६ ॥
तच्छ्रुत्वा भूपतिर्दध्यौ सा नूनं मम नन्दिनी ।
अलक्षणा तत्प्रभावात्[1] कुष्ठी जातोऽस्य पुत्रकः ॥ ७ ॥
स्वकर्मफलभोक्तारः सर्वे जगति जन्तवः ।
अयं हि निश्चयनयो यद्यप्यस्ति जिनोदितः ॥ ८ ॥

---

(१) ख ग ङ च छ तत्प्रभावेन ।

तथापि व्यवहारोऽयं यो हेतुः सुखदुःखयोः ।
स एव क्रियते लोके[1] भाजनं गुणदोषयोः ॥ ९ ॥ (युग्मम्)
स्वकर्म्मपरिणामेन जज्ञे पुत्रोऽस्य कुष्ठिकः ।
जाता च तन्निमित्तत्वात्पुत्री मे दोषभाजनम् ॥ १० ॥
ऊचे च सचिवोऽनर्थमकार्षमहमीदृशम् ।
नादास्यं चेत्सुतां कुष्ठी नाभविष्यत्सुतोऽपि ते ॥ ११ ॥
अमात्योऽप्यब्रवीत् स्वामिन् हितकार्यं प्रकुर्वताम् ।
को दोषो भवतामत्र दोषो मत्कर्मणां पुनः ॥ १२ ॥
अथोत्थाय ययौ मन्त्री सा तु[2] त्रैलोक्यसुन्दरी ।
इष्टाऽप्यनिष्टा संजाता राज्ञः परिजनस्य च ॥ १३ ॥
न कोऽप्येनामाललाप नाभ्यनन्दत् दृशाऽपि हि ।
एकत्र गुप्तगेहेऽस्थात् सा मातृगृहपृष्ठतः ॥ १४ ॥
अचिन्तयच्च दुष्कर्म्म किं मया विहितं पुरा ।
येन क्वापि ययौ नष्टा परिणीतः स मे पतिः ॥ १५ ॥
अन्यच्च लोकमध्येऽदः कलङ्कं समुपस्थितम् ।
किं करोमि क्व गच्छामि व्यसने पतिताऽस्मि हा ॥ १६ ॥
एवं चिन्तां प्रकुर्वन्त्यास्तस्याश्चित्ते स्थितं तदा ।
भवितोज्जयिनीपुर्य्यां प्राप्तो नूनं स मे पतिः ॥ १७ ॥
तदा च मोदकांस्तेन भुक्त्वा संजल्पितं किल ।
एते हि मोदका रम्याः किं त्ववन्त्या जलोचिताः ॥ १८ ॥

---

(१) घ ङ लोकैः ।
(२) ग ङ साऽन्तु ।

ततः केनाप्युपायेन तत्र गच्छाम्यहं यदि ।
तत्रान्विष्य मिलित्वा [1]च भवामि सुखभागिनी ॥ १९ ॥
अथान्येद्युरुवाचाम्बां हे मातर्जनको मम ।
एकवारं यथा वाक्यं शृणोति त्वं तथा कुरु ॥ २० ॥
तां दृष्ट्वाऽनादरपरामन्येद्युः सिंहनामकम् ।
सामन्तं ज्ञापयामास सा तमर्थं कृताञ्जलिः ॥ २१ ॥
सोऽथ राजकुले गत्वा नृपं नत्वोपविश्य च ।
इति विज्ञापयामास प्रस्तावे वदतां वरः ॥ २२ ॥
नृनाथ भवता मान्यचरी सम्यत्यसम्मता ।
वराकी वर्त्तते कष्टे सैषा[2] त्रैलोक्यसुन्दरी ॥ २३ ॥
अस्याः संमानदानादि दूरेऽस्त्वालपनं तथा ।
वाक्यश्रवणमात्रेण प्रसादोऽद्य विधीयताम् ॥ २४ ॥
पार्थिवोऽप्यश्रुपूर्णाक्षः प्रोचे सिंह पुराभवे ।
अनया विहितं किञ्चिदभ्याख्यानादि दुष्कृतम् ॥ २५ ॥
तदियं तत्प्रभावेन कलङ्कितततनूरभूत् ।
दृष्टाऽप्यनिष्टतां प्राप्ता गाढमस्माकमप्यहो ॥ २६ ॥
वाक्यं तदद्य यत्किञ्चिदनयाऽस्ति विवक्षितम् ।
तद् ब्रवीतु न रुष्टैरप्यात्मीयः परिभूयते ॥ २७ ॥
ततस्तदनुमत्यैत्य तत्र त्रैलोक्यसुन्दरी ।
उवाच तात मे वेषं कुमारोचितमर्पय ॥ २८ ॥

---

(१) ख ग घ ङ च छ ज्स्य ।
(२) ग ङ छ कष्टेनैषा ।

भूयो राजाऽब्रवीत् सिंहं किमिदं वक्ष्यसी वचः ।
सोऽवदद्देव युक्तं हि क्रमोऽस्ति यदयं किल ॥ २९ ॥
राज्ञां गृहेषु चेत्पुत्री गुरुकार्येण केनचित् ।
पुंवेषं याचते तस्यै दातव्यः स न संशयः ॥ ३० ॥
ततस्तदनुमत्याऽस्यै पुंवेषं पार्थिवो ददौ ।
आदिदेश च तं सिंहं तद्रक्षार्थं बलान्वितम् ॥ ३१ ॥
अभ्यधात्सुन्दरी भूयस्तातानुज्ञां चेद्ददेत्तव ।
उज्जयिन्यां ततो यामि कारणेन गरीयसा ॥ ३२ ॥
कारणं कथयिष्यामि तज्ज्ञाते च समीहिते ।
अधुना कथिते तस्मिन् परिणामो न शोभनः ॥ ३३ ॥
हे पुत्रि[1] मम वंशस्य यथा नाम्येति दूषणम् ।
तथा कार्यं त्वयेत्युक्ता विसृष्टा सा महीभुजा ॥ ३४ ॥
ततश्च सिंहसामन्तभूरिसैन्यसमन्विता ।
अखण्डितप्रयाणैः सा ययावुज्जयिनीं पुरीम् ॥ ३५ ॥
वैरिसिंहो नृपोऽथैवं शुश्राव जनतामुखात् ।
यच्चम्पायाः समागच्छन्नस्त्यत्र नृपनन्दनः ॥ ३६ ॥
अभियानादिसन्मानस्वागतप्रश्नपूर्वकम् ।
पुरे प्रवेश्य तेनासावानीतो निजमन्दिरे ॥ ३७ ॥
पृष्टा चागमनार्थं सा प्रोवाच नगरीमिमाम् ।
द्रष्टुमाश्चर्यसंपूर्णामागतोऽस्मि कुतूहलात् ॥ ३८ ॥

---

(१) ग ङ च छ पुत्रिके ।

ततः प्रोक्तो नरेन्द्रेण त्वया स्थेयं ममौकसि ।
सुरसुन्दरराजस्य मम गेहस्य नान्तरम् ॥ ३९ ॥
राजढौकितगेहे सा तस्थौ सबलवाहना ।
पत्तीँश्चेत्यादिशत् स्वादु नीरस्थानं निरीक्ष्यताम् ॥ ४० ॥
पूर्वस्यां दिशि तं तत्तु ज्ञात्वा तस्यै न्यवेदयन् ।
तन्मार्गे कारितावासे ऽवात्सीत् साऽथ नृपाज्ञया ॥ ४१ ॥
गच्छतो नीरपानार्थमन्यदाऽश्वान्निरीक्ष्य तान् ।
सा दध्यौ मम तातस्य सन्त्येते तुरङ्गमाः ॥ ४२ ॥
तेषामनुपदं प्रेष्य पुनर्भृत्यान्[1] विदेद सा ।
भर्त्तुर्गृहाभिधानादिसर्वशुद्धिं मनस्विनी ॥ ४३ ॥
कलाभ्यासपरं तं च ज्ञात्वा त्रैलोक्यसुन्दरी ।
उवाच सिंहमेते हि कथं ग्राह्यास्तुरङ्गमाः ॥ ४४ ॥
सिंहोऽवादीत्त्वयाऽऽदिष्टोपायेनैव ततश्च सा ।
सच्छात्रं तं कलाचार्यं भोजनाय न्यमन्त्रयत् ॥ ४५ ॥
भोजनार्थमुपाध्याये तत्रायाते ददर्श सा ।
छात्रमध्ये स्वभर्त्तारं हृदयानन्ददायिनम् ॥ ४६ ॥
तस्मा आसनमात्मीयं स्थालं चादापयत्तदा ।
अकारयद्विशेषेण गौरवं भोजनादिषु ॥ ४७ ॥

---

(१) च भृत्यान्।

ततो वस्त्राणि सर्वेभ्यो यथायुक्तमदत्त सा ।
तस्यै निजाङ्गलग्नं च वासोयुग्मं मनोहरम् ॥ ४८ ॥
उवाच च कलाचार्यमेतन्मध्यात् त्वदाज्ञया ।
यो जानाति स आख्यातु च्छात्रो मम कथानकम् ॥ ४९ ॥
सर्व्वैरपीर्ष्यया छात्रैर्निर्दिष्टः सोऽथ मङ्गलः ।
उपाध्यायगिरा धीमान् वक्तुमेवं प्रचक्रमे ॥ ५० ॥
चरितं कल्पितं किं वा कथयामि कथानकम् ।
साऽवदच्चरितं ब्रूहि, पर्याप्तं कल्पितेन भोः ॥ ५१ ॥
मङ्गलश्चिन्तयामास सैषा त्रैलोक्यसुन्दरी ।
चम्पापुर्यां भाटकेन परिणीता हि या मया ॥ ५२ ॥
केनापि हेतुनेहागात् भूत्वा पुंवेषधारिणी ।
भवत्वेवं कथां तावत् कथयामि निजामहम् ॥ ५३ ॥
जगाद च कथा लोकप्रिया चित्रकरी भवेत् ।
सा च वृत्ता मदीयेऽङ्गे तामाख्यामि निशम्यताम् ॥ ५४ ॥
ततश्चात्मकथा तेनादितस्तत्र प्रकाशिता ।
तावद्यावदमात्येन गृहान्निर्वासितोऽस्म्यहम् ॥ ५५ ॥
अत्रान्तरे कृतालीककोपा राजसुताऽवदत् ।
अमुं गृह्णीत गृह्णीत रे रे मिथ्याभिभाषिणम् ॥ ५६ ॥
इत्युक्ते पत्तयस्तस्यास्तद्ग्रहार्थं समुद्यताः ।
तयैव वारिताः शीघ्रं स चानीतो गृहान्तरे ॥ ५७ ॥
अथैनमासनेऽध्यास्य सिंहमूचे नृपात्मजा ।
अयि येनाहमूढाऽस्मि स एवायं प्रियो मम ॥ ५८ ॥

किमत्र युज्यते कर्त्तुमित्युक्तः सोऽपि चाब्रवीत् ।
अयं तव भवेद्भर्त्ता[1] तदा सेव्योऽपशङ्कितम् ॥ ५९ ॥
सोचे सिंहं तवाद्यापि चित्ते यद्यस्ति संशयः ।
ततोऽस्य मन्दिरे गत्वा स्थालादीनि विलोकय[2] ॥ ६० ॥
तद्विधातुमथो सिंहो धनदत्तगृहं ययौ ।
सोऽग्रे छात्रमुखात् पुत्रापायं श्रुत्वाऽऽकुलोऽभवत् ॥ ६१ ॥
पुत्रस्य गौरवोदन्तमाख्यायैतेन बोधितः ।
दर्शयामास च स्थालादीनि तद्भणितोऽस्य सः ॥ ६२ ॥
वध्वाः स्वरूपकथनेनाह्लाद्य श्रेष्ठिनं ततः ।
सिंहः पुना राजपुत्रान् समीपं समुपाययौ ॥ ६३ ॥
सिंहेनानुमता साऽथ कृत्वा स्त्रीवेषमुद्भटम् ।
बभूव वल्लभा तस्य मङ्गलस्य महात्मनः ॥ ६४ ॥
ययौ च श्रेष्ठिनो वेश्म तत् युग्मं पार्थिवोऽपि तत् ।
आकार्य सर्ववृत्तान्तं पृष्ट्वा श्रुत्वा विसिस्मिये ॥ ६५ ॥
ततस्तत्रैव प्रासादे गत्वा राजाज्ञया पुनः ।
समं त्रैलोक्यसुन्दर्य्या विललास स मङ्गलः ॥ ६६ ॥
सुन्दर्या प्रेषितः सोऽथ सिंहः सबलवाहनः ।
लात्वा पुरुषवेषं तं ययौ चम्पापुरीं पुनः ॥ ६७ ॥
अमुना सर्ववृत्तान्ते कथिते जगतीपतिः ।
हृष्टोऽभाषिष्ट वत्साया अहो मे मतिकौशलम् ॥ ६८ ॥

---

(१) ख ग ङ छ अयं हि तव चेद्भर्त्ता ।
(२) ङ च गवेषय ।

अहो कुधीरमात्यस्य पापकर्मविधायिनः ।
येनादोषाऽपि मत्पुत्री सदोषा विहिता कथम् ॥ ६९ ॥
सिंहं पुनरपि प्रेष्योज्जयिन्यां निजनन्दिनीम् ।
सकान्तां स समानाय्य सच्चक्रे च यथाविधि ॥ ७० ॥
अमात्यं धारयित्वा तं मार्यमाणं महीभुजा ।
मङ्गलो मोचयामास गाढाभ्यर्थनया नृपात् ॥ ७१ ॥
जामातुरुपरोधेन मया मुक्तोऽसि पाप रे ।
इति विब्रुवता राज्ञा सोऽथ निर्वासितः पुरात् ॥ ७२ ॥
अपुत्रः सोऽथ भूपालो मेने जामातरं सुतम् ।
तत्रैवानाययामास तन्मातापितरावपि ॥ ७३ ॥
अन्येद्युर्मन्त्रिसामन्तसंमत्योत्सवपूर्वकम् ।
मङ्गलकलसं राज्ये सुधीः स्थापयति स्म सः ॥ ७४ ॥
यशोभद्राभिधानानां सूरीणां चरणान्तिके ।
सुरसुन्दरभूपालः परिव्रज्यामुपाददे ॥ ७५ ॥
राज्ये संस्थापितः कोऽपि वणिग्जातिरितीर्थ्यया ।
प्रत्यन्तपार्थिवो राज्यं हर्तुं तस्योपतस्थिरे ॥ ७६ ॥
सेनया चतुरङ्गिण्या सहितेन महौजसा ।
दृढपुण्यप्रभावेन जिताः सर्वेऽपि तेन ते ॥ ७७ ॥
शान्तामित्रस्य तस्याथ राज्यं पालयतः सतः ।
पत्न्यां चैलोक्यसुन्दर्यां सुतोऽभूज्जयशेखरः ७८ ॥
स च राजा निजे देशे जिनचैत्यान्यनेकशः ।
जिनार्चारथयात्याद्येत्यादिधर्ममकारयत् ॥ ७९ ॥

अन्यदोद्यानमायातं जयसिंहाभिधं गुरुम् ।
गत्वा ववन्दे भावेन सकलत्रः सभूपतिः ॥ ८० ॥
पप्रच्छ च यथा केन कर्मणा भगवन्मया ।
प्राप्ता बिडम्बनोद्वाहे देव्या प्राप्तं च दूषणम् ॥ ८१ ॥
सूरिरूचेऽथ भरते क्षेत्रेऽत्रैवास्ति पत्तनम् ।
क्षितिप्रतिष्ठितं नाम धनधान्यसमृद्धिमत् ॥ ८२ ॥
आसीत्तत्र सोमचन्द्राभिधानः कुलपुत्रकः ।
श्रीदेवी च तद्भार्याऽभूत् तौ मिथः प्रीतिशालिनौ ॥ ८३ ॥
सोमचन्द्रः प्रकृत्यासावार्जवादिगुणान्वितः ।
मान्यः समस्तलोकानां तस्य भार्या च तादृशी ॥ ८४ ॥
इतस्तत्रैव नगरे जिनदेवाभिधः सुधीः ।
श्रावकोऽभूत्समं तेन तस्य मैत्री निरन्तरा ॥ ८५ ॥
जिनदेवो धनाकाङ्क्षी धने सत्यपि सोऽन्यदा ।
देशान्तरं गन्तुकामो निजं मित्रमभाषत ॥ ८६ ॥
धनायाहं गमिष्यामि मयि तत्र गते त्वया ।
मामकीनं धनं सप्तक्षेत्र्यां वाप्यं यथाविधि ॥ ८७ ॥
तवापि तस्य पुण्यस्य षष्ठांशो भवतादिति ।
दीनाराणां सहस्राणि दशैतस्यार्पयत्करे ॥ ८८ ॥
गते देशान्तरे तस्मिन् सोमचन्द्रोऽथ तत्सुहृत् ।
व्ययति स्म यथास्थानं तद्द्रव्यं शुद्धचेतसा ॥ ८९ ॥
आत्मीयमपि तस्यानुसारेणायं व्यधादृषम् ।
तज्ज्ञात्वा तस्य भार्याऽपि धर्मं भेजेऽनुमोदनात् ॥ ९० ॥

तस्मिन्नेव पुरे तस्याः सखी भद्राऽभिधाऽभवत् ।
नन्दस्य श्रेष्ठिनः पुत्रो देवदत्तस्य गेहिनी ॥ ९१ ॥
देवदत्तः स कालेन कर्मदोषेण केनचित् ।
कुष्ठी जज्ञे ततो भद्रा तत्प्रिया विषसाद सा ॥ ९२ ॥
पुरःसख्यास्तयाऽन्येद्युस्तत्स्वरूपं निवेदितम् ।
तया च हासपरया भणिता सा ससंभ्रमम् ॥ ९३ ॥
हले त्वत्सङ्गदोषेण कुष्ठी जज्ञे पतिस्तव ।
ममापि दृष्टिं मागास्त्वमतोऽपसर दूरतः ॥ ९४ ॥
सा तेन वचसा दूना तस्थौ श्यामसुखी क्षणम् ।
हास्यमेतदिति प्रोच्य तयैवाश्वासिता ततः ॥ ९५ ॥
स सोमचन्द्रः श्रीदेव्या तया सार्द्धं च भार्यया ।
साधुसंसर्गतः प्राप्तं श्राद्धधर्ममपालयत् ॥ ९६ ॥
अन्ते समाधिना मृत्वा सौधर्मे त्रिदशावि मौ ।
दम्पती समजायेतां पञ्चपल्योपमस्थिती ॥ ९७ ॥
सौधर्मात्सोमचन्द्रात्मा च्युत्वाऽभूत् भूपतिर्भवान् ।
जीवश्चयुत्वा च श्रीदेव्या जज्ञे त्रैलोक्यसुन्दरी ॥ ९८ ॥
परद्रव्येण यत्पुण्यं भवतोपार्जितं तदा ।
तदेषा भाटकेनैव परिणीता नृपात्मजा ॥ ९९ ॥
हास्येनापि वयस्याये यद्दत्तमनया पुरा ।
तदेतस्यामिह भवे कलङ्कः समभूद् ध्रुवम् ॥ ३०० ॥
तदाकर्ण्य विरक्तौ तौ दत्त्वा राज्यं स्वसूनवे ।
राजा राज्ञी च प्रव्रज्यां पार्श्वे जगृहतुर्गुरोः ॥ १ ॥

क्रमेण सोऽथ राजर्षिः सर्वसिद्धान्तपारगः ।
स्थापितो गुरुणा सूरिपदे परिकराङ्कितः ॥ २ ॥
त्रैलोक्यसुन्दरी साध्वी स्थापिता च प्रवर्त्तिनी ।
विपद्योभौ च तावन्ते ब्रह्मलोकमुपेयतुः ॥ ३ ॥
ततश्च्युतौ मनुष्यत्वं प्राप्यानिमिषतां पुनः ।
एवं भवे तृतीये तौ प्रापतुः पदमव्ययम् ॥ ४ ॥

॥ इति मङ्गलकलसकथानकम् ॥

श्रुत्वा धर्मकथामेतां प्रतिबुद्धो महीपतिः ।
गुरोः पार्श्वे स सम्यक्त्वं श्राद्धधर्ममुपाददे ॥ ५ ॥
विजहारान्यतः सूरी श्रीषेणनृपतिः पुनः ।
राज्यं तज्जैनधर्मं च पालयामास यत्नतः ॥ ६ ॥
राज्ञ एवोपदेशेन तत्प्रिया साऽभिनन्दिता ।
भेजे धर्मं विशेषेण भद्रकत्वं तथाऽपरे ॥ ७ ॥
इतश्च बलभूपेन कौशाम्बीस्वामिनाऽन्यदा ।
श्रीमतीकुक्षिसम्भूता श्रीकान्ता तनया निजा ॥ ८ ॥
श्रीषेणतनयस्येन्दुषेणस्यार्थे स्वयंवरा ।
प्रेषिता नगरे तत्र परिवारसमन्विता ॥ ९ ॥ (युग्मम्)
रूपातिशयसम्पन्नां तां दृष्ट्वा नवयौवनाम् ।
उभावपि परिणेतुकामौ तौ नृपनन्दनौ ॥ १० ॥
अयुध्येतां मिथो देवरमणोद्यानमध्यगौ ।
सन्नद्धगाढकवचौ वन्येभाविव दारुणौ ॥ ११ ॥ (युग्मम्)

स श्रीषेणनृपः स्वल्पकषायः स्वच्छमानसः ।
जिनोक्त्या भावितोऽत्यन्तं क्षमासारः प्रियंवदः ॥ १२ ॥
वैरायमाणौ तावित्थं निरीक्ष्य निजनन्दनौ ।
निवारयितुमनलभूष्णुरेवं विचिन्तयत् ॥ १३ ॥ (युग्मम्)
अहो विषयलाम्पट्यं वैचित्र्यं कर्मणामहो ।
रागद्वेषावहो शत्रू अहो मोहविजृम्भितम् ॥ १४ ॥
महाप्राज्ञौ महात्मानौ भूत्वाऽपि मम नन्दनौ ।
यदेतावेककामिन्याः कृते विदधतुः कलिम् ॥ १५ ॥
अनयोर्दुश्चरित्रेण लज्जमानः सभान्तरे ।
मुखं नगरमुख्यानां दर्शयिष्याम्यहं कथम् ॥ १६ ॥
तदेतस्यामवस्थायां मरणं शरणं मम ।
इत्यभिप्रायमात्मीयं देव्याः कथयति स्म सः ॥ १७ ॥
ततस्ताभ्यां सममसौ स्मृतः पञ्चनमस्कृतिः ।
विषमिश्रोत्पलाघ्राणप्रयोगेण व्यपद्यत ॥ १८ ॥
सत्यभामाऽपि तेनैव विधिना जीवितं जहौ ।
बिभ्यती कपिलस्यास्य दुष्टशीलस्य सङ्गमात् ॥ १९ ॥
जम्बूद्वीपविदेहस्यान्तर्वत्युत्तरसंज्ञिते ।
कुरुक्षेत्रे ऽभवज्जीवास्ते चत्वारोऽपि युग्मिनः ॥ २० ॥
श्रीषेणाद्यप्रियाजीवावाद्यं मिथुनकं तथा ।
द्वितीयं मिथुनं सिंहनन्दितासत्यभामयोः ॥ २१ ॥
इतस्तयोरिन्दुविन्दुषेणयोर्युद्ध्यमानयोः ।
एकस्तत्र कुतोऽप्येत्य चारणर्षिरदोऽवदत् ॥ २२ ॥

उत्तमान्वयसंभूतौ स्वयं चरमविग्रहौ ।
कुर्वाणावीदृशं कर्म लज्जेथे किं न भो युवाम् ॥ २३ ॥
दृष्ट्वाऽसमञ्जसमिदं सभार्यौ युवयोः पिता ।
विषान्नाणप्रयोगेण मरणं समवाप सः ॥ २४ ॥
ययोरुपकृतस्येह नास्ति सीमा महीतले ।
तयोः पित्रोर्विनाशाय जातौ धिग् दुःसुतौ युवाम् ॥ २५ ॥
तदियं मोहगोपीया दामिनी दृषदामिनी ।
त्यज्यतां कामिनी स्वैरगामिनी कलहावनी ॥ २६ ॥
इति तद्दचसा बुद्धौ त्यक्तयुद्धौ शुभाशयौ ।
तौ तं नत्वा मुनिमेवमुपश्लोकयतां मुदा ॥ २७ ॥
त्वं गुरुस्त्वं पिता माता त्वं बन्धुः स्निग्ध आवयोः ।
येनावां रक्षितौ रागद्वेषोपार्जितदुर्गतेः ॥ २८ ॥
विसृज्य [1]महिलामेतां तौ गतौ निजमन्दिरम् ।
पित्रादीनां प्रेतकार्यं सर्वं विदधतुस्ततः ॥ २९ ॥
दत्त्वाऽथ गोत्रिणे राज्यं पार्श्वे धर्मरुचेर्मुनेः ।
नॄणां चतुःसहस्रैस्तौ सार्द्धं जगृहतुर्व्रतम् ॥ ३० ॥
पालयित्वा चिरं दीक्षां कृत्वा च विविधं तपः ।
उत्पाद्य केवलं ज्ञानं तौ कैवल्यमुपेयतुः ॥ ३१ ॥

---

(१) ङ वनिता-।

श्रीषेणमुख्या मिथुनद्वयी सा भुक्त्वोत्तरप्राग्यकुरौ सुखानि ।
पश्चात्तु सौधर्ममियाय कल्पं तत्रापि पल्यत्रितयायुरासीत् ॥३३२॥

इत्याचार्यश्रीअजितप्रभसूरिविरचिते श्रीशान्ति-
नाथचरित्रे पूर्वभवत्रयवर्णनो नाम
प्रथमः प्रस्तावः ।

द्वितीयः प्रस्तावः ।

इतश्चात्रैव वैताढ्य उत्तरश्रेणिभूषणम् ।
रथनूपुरचक्रवालाख्यमस्ति पुरं वरम् ॥ १ ॥
विद्याधरेन्द्रो ज्वलनजटी तत्राभवद्बली ।
स्वाहा वायुसखस्येव वायुवेगा च तत्प्रिया ॥ २ ॥
तत्कुक्षिसंभवो वैरिवारोल्बणतमोरविः ।
तस्यार्ककीर्त्तिरित्यासीत्पुत्रोऽर्कस्वप्नसूचितः ॥ ३ ॥
समधीतकलः सोऽथ विनयादिगुणान्वितः[1] ।
युवराजपदेऽस्थापि पित्रा संप्राप्तयौवनः ॥ ४ ॥
पुत्री तदनुजा चन्द्रलेखास्वप्नोपसूचिता ।
आसीत् स्वयंप्रभानाम्नी [2]स्वातन्त्र्यरहिता परम् ॥ ५ ॥
तत्राभिनन्दनजगन्नन्दनौ मुनिपुङ्गवौ ।
अन्येद्युरागतौ व्योमचारिणौ पापहारिणौ ॥ ६ ॥
कन्या स्वयंप्रभा सा तु श्रुत्वा धर्मं तदन्तिके ।
बभूव श्राविका शुद्धसामाचारी शुभाशया ॥ ७ ॥
साधू विजहृतुस्तौ क्ष्मां कन्या सा च स्वयंप्रभा ।
प्राप्ते पर्वदिनेऽन्येद्युः प्रपेदे पौषधव्रतम् ॥ ८ ॥

---

(१) ङ च -न्वितः ।
(२) च रूपातिशयशालिनी ।

तस्य पारणके जैनबिम्बमभ्यर्च्च [1]वेश्मगम् ।
तच्छेषामर्पयामास गत्वा तातस्य सन्निधौ ॥ ९ ॥
शीर्षे शेषां तथोत्सङ्गे पत्नीमाधाय भूपतिः ।
तद्रूपवयसौ वीक्ष्य चेतस्येवमचिन्तयत् ॥ १० ॥
वरप्रदानयोग्येयं संजाता मम कन्यका ।
तद्भर्त्ता कोऽनुरूपोऽस्या भविष्यति नभश्चरः ॥ ११ ॥
कुरु पारणकं तावत् पुत्रीत्युक्त्वा विसृज्य ताम् ।
आकार्य मन्त्रिणश्चात्मचिन्तितं तदजिज्ञपत् ॥ १२ ॥
उवाच सुश्रुतस्तेषु देवरत्नपुरे वरे ।
[2]मयूरग्रीवस्तत्पुत्रोऽश्वग्रीवोऽस्ति खगेश्वरः ॥ १३ ॥
भरतार्द्धमहीभर्त्ता युक्तः पुत्र्या वरो हि सः ।
बहुश्रुतोऽवदच्चैतन्न युक्तं प्रतिभाति मे ॥ १४ ॥
यतोऽयं वर्त्तते वृद्धस्तदन्यः कोऽपि रूपवान् ।
वयःशीलकुलैस्तुल्यो वरः पुत्र्याः करिष्यते ॥ १५ ॥
ततो लब्धावकाशेन प्रोचे सुमतिमन्त्रिणा ।
यथा देवोत्तरश्रेण्यां पुरी नाम प्रभङ्करा १६ ॥
तत्र मेघधनो राजा तद्भार्या मेघमालिनी ।
पुत्रो विद्युत्प्रभः पुत्री ज्योतिर्माला तयोर्वरा ॥ १७ ॥
योग्यो विद्युत्प्रभः सोऽस्या युष्मत्पुत्र्याः पतिस्तथा ।
ज्योतिर्माला कुमारस्य पत्नी भवितुमर्हति ॥ १८ ॥

---

(१) च वेश्मनि ।
(२) ख घ मयूरग्रीवस्तूरश्वग्रीवोऽस्ति वरखेचरः ।
ग च मयूरग्रीवस्तूरश्वग्रीवोऽस्ति खेचरेश्वरः ॥

भणितं च ततोऽन्येन श्रुतसागरमन्त्रिणा ।
देवास्या युज्यते कर्त्तुं कन्यकायाः स्वयंवरः ॥ १९ ॥
श्रुत्वेदं मन्त्रणं राजा मन्त्रिणो विससर्ज तान् ।
संभिन्नश्रोतःसंज्ञं चापृच्छन्नैमित्तिकोत्तमम् ॥ २० ॥
नैमित्तिकोऽवदद्राजन् यौ पोतनपुरेशितुः ।
पुत्रौ प्रजापतेः राज्ञस्त्रिपृष्ठाचलसंज्ञकौ ॥ २१ ॥
तावत्र भरते विष्णुबलभद्रौ भविष्यतः ।
प्रतिविष्णुममुं चाश्वग्रीवं व्यापादयिष्यतः ॥ २२ ॥
इति साधुमुखाद्राज्ञां मया श्रुतमतः परम् ।
स्वज्ञानेनापि विज्ञाय कथयामि महीपते ॥ २३ ॥
तुभ्यं विद्याधरेशत्वं स त्रिपृष्ठः प्रदास्यति ।
एषा स्वयंप्रभा चाग्रमहिषी तस्य भाविनी ॥ २४ ॥
ततश्च [1]परितुष्टोऽसौ राजाऽभ्यर्च्य विसृज्य तम् ।
प्रेषयामास दूतं च मारीचिं पोतने पुरे ॥ २५ ॥
गत्वा नत्वाऽमुनेत्युक्तः प्रजापतिनरेश्वरः ।
यदस्माकं विभुर्विद्याधरेन्द्रो ज्वलनाभिधः ॥ २६ ॥
कन्यां स्वयंप्रभानाम्नीं त्रिपृष्ठाय सुताय ते ।
प्रभो दित्सति तेनाहं प्रेषितोऽस्मि तवान्तिकम् ॥ २७ ॥
जगे प्रजापतिः कार्यमेतत् बहुमतं मम ।
बलित्वाऽऽगत्य दूतोऽपि तदाचख्यौ स्वभूभुजे ॥ २८ ॥

---

(१) ज परितुष्टेन राज्ञा-।

दूतोऽश्वग्रीवभूपेनाश्वबिन्दुर्दृष्टप्रत्ययः ।
पृष्टो नैमित्तिको मृत्युर्मम भावी कुतो [1]न्विति ॥ २९ ॥
सोऽवदच्चण्डवेगं ते यो दूतं धर्षयिष्यति ।
शालिक्षेत्रापकर्त्तारं हनिष्यति हरिं च यः ॥ ३० ॥
स ते हन्तेति श्रुत्वा तं सत्कृत्य व्यसृजन्नृपः ।
पुत्रौ प्रजापतेः क्रूराविति लोकाद्विवेद च ॥ ३१ ॥
तेनाथ प्रेषितो राज्ञा ययौ दूतोऽस्खलद्गतिः ।
प्रजापतिनृपास्थाने भवत्प्रेक्षणनिर्भरे ॥ ३२ ॥
सद्यः प्रेक्षणरङ्गस्य भङ्गं दृष्ट्वा कुमारकौ ।
त्रिपृष्ठाचलनामानौ तस्मै चुकुपतुर्भृशम् ॥ ३३ ॥
दूतः सत्कृत्य राज्ञाऽसौ विसृष्टश्चलितश्च सः ।
त्रिपृष्ठाचलयोरग्रे कथितस्तत्पदातिभिः ॥ ३४ ॥
ताभ्यां गत्वा मुष्टिपार्ष्णिप्रहारेण निपोडितः ।
तद्भङ्गभङ्गाविनयं स्मरयद्भ्यां मुहुर्मुहुः ॥ ३५ ॥
श्रुत्वा प्रजापतौ राजा सुतयोस्तद्विचेष्टितम् ।
तं दूतं क्षमयामास सचक्रे च विशेषतः ॥ ३६ ॥
तद्दूतधर्षणं चारमुखेनाश्वनृपोऽशृणोत् ।
पश्चात् स चण्डवेगोऽपि तत्समीपमुपागतः ॥ ३७ ॥
ज्ञातोदन्तं नृपं ज्ञात्वा सोऽथ तस्मै यथातथम् ।
आख्याय पुनरप्यूचे देवेदं बालचेष्टितम् ॥ ३८ ॥

---

(१) च नरात् ।

प्रजापतिनृपस्त्वान्नां न ते लङ्घयति क्वचित् ।
तदेतस्योपरि क्रोधो न कर्त्तव्यो मनागपि ॥ ३९ ॥
शालिक्षेत्राण्यथो तस्य वारंवारेण पार्थिवैः ।
रक्ष्यन्ते स्म मृगारातेः प्रतिवर्षमुपद्रवात् ॥ ४० ॥
तस्मिन् वर्षे च तद्रक्षामन्यदूतमुखेन सः ।
प्रजापतिमवारेऽप्यकारयत् क्रुद्धमानसः ॥ ४१ ॥
पितरं प्रतिषिध्याथ कुमारौ बलशालिनौ ।
जग्मतुस्तत्र यत्रास्ति शालिक्षेत्रप्रदेशभूः ॥ ४२ ॥
शशंसुर्विस्मितास्तेऽथ शालिगोपकपूरुषाः ।
रक्ष्यन्ते शालयो ह्येते नृपैः सबलवाहनैः ॥ ४३ ॥
युवां कावपि वर्त्तेथे नवीनौ शालिरक्षकौ ।
निःसन्नाहौ समायातौ यौ सैन्यपरिवर्जितौ ॥ ४४ ॥
ऊचे त्रिपृष्ठो भोस्तावत्स सिंहो दर्श्यतां मम ।
यथा तद्रक्षणक्लेशं सर्वथा वारयाम्यहम् ॥ ४५ ॥
ततस्तैर्दर्शितस्तस्य सिंहो गिरिगुहाशयः ।
ययौ च तद्गुहाद्वारे त्रिपृष्ठोऽपि रथस्थितः ॥ ४६ ॥
रथचीत्कारनादेन जजागार स केशरी ।
प्रसारितास्यकुहरो गुहाया निर्जगाम च ॥ ४७ ॥
पदातिं तं समालोक्य कुमारोऽपि तथाऽभवत् ।
मुमोच खड्गरत्नं च तं निरीक्ष्य निरायुधम् ॥ ४८ ॥
कुमारचेष्टितं दृष्ट्वा दध्यौ सिंहोऽपि विस्मितः ।
अहो आश्चर्यमेकं तत् यदेकोऽयमिहागतः ॥ ४९ ॥

द्वितीयं पादचारित्वं तृतीयं खड्गमोचनम् ।
तदस्य दर्शयाम्यद्यावज्ञायाः फलमात्मनः ॥ ५० ॥
इत्युत्पत्याम्बरे रोषात् पतितो मस्तकोपरि ।
प्रचिक्षेप कुमारो द्राक् करौ केशरिणो मुखे ॥ ५१ ॥
एकेन पाणिनाऽऽदाय तस्यौष्ठमपरेण तु ।
अधरं दारयामास तं ततो जीर्णपोतवत् ॥ ५२ ॥
द्विधा कृत्वा विनिक्षिप्तं पृथिव्यां तत्कलेवरम् ।
स्फुरत्तदपि रोषेण प्रोचे सारथिनांजसा ॥ ५३ ॥
नरसिंहकुमारोऽयं पशुसिंहो भवान् पुनः ।
हतोऽसि सिंह सिंहेनाऽनुशयं भोः करोषि किम् ॥ ५४ ॥
प्रीतोऽपि वचसा तेन स मृत्वा नरकं गतः ।
प्राजापत्योऽपि तच्चर्माखग्रीवस्यार्पयत्तदा ॥ ५५ ॥
तेनैवादिष्टतत्स्थविद्याधरनरेरथ ।
इति चाकथयद्यत्त्वं भुङ्क्ष्वान्धो मत्प्रसादतः ॥५६॥(युग्मम्)
दृष्ट्वाऽऽकर्ण्य च [1]तद्वाजिग्रीवोऽप्येवमचिन्तयत् ।
अलंभूष्णुर्ममाप्येष दोर्बलेनामुना खलु ॥ ५७ ॥
ज्ञात्वोदन्तं च कन्याया ज्वलनात्तामयाचत ।
सोऽपि कृत्वोत्तरं किञ्चित् तत्पुंसां तमबोधयत् ॥ ५८ ॥
नीत्वा प्रच्छन्नमेतां च पुरे पोतननामनि ।
सांवत्सरोपदिष्टेन त्रिपृष्ठेनोदवाहयत् ॥ ५९ ॥

---

(१) ख च छ तद्वीर्यं ग्रीवो- ।

हरिश्मश्रुरथामात्यः परिणीतां स्वयंप्रभाम् ।
श्रुत्वा कुतश्चित्कथयामासाश्वग्रीवभूभुजे ॥ ६० ॥
तेनायं कुपितेनैवमादिष्टो यदिहानय ।
तौ त्रिपृष्ठाचलौ बध्वा खेचरं तं च मायिनम् ॥ ६१ ॥
प्रेषितश्चामुना दूतः स गत्वा पोतने पुरे ।
ज्वलनं प्रत्यभाषिष्ट पटिष्ठवचनोद्यतः ॥ ६२ ॥
ननु भोः कन्यकारत्नं ढौकय स्वामिनो मम ।
किं न जानासि रत्नानां प्रभुरेव गतिर्भवेत् ॥ ६३ ॥
ज्वलनोऽप्यब्रवीद्दूत प्रदत्ता कन्यका मया ।
त्रिपृष्ठाय तदेतस्या एष रत्नाकरोऽधुना ॥ ६४ ॥
ऊचे त्रिपृष्ठो रे दूत परिणीता मया ह्यसौ ।
इमामिच्छन् स ते स्वामी निर्विषो जीवितान्नु किम् ॥ ६५ ॥
तद्दूतवचनात् श्रुत्वाऽश्वग्रीवः क्रोधदुर्द्धरः ।
विद्याधरभटान् प्रैषीत् हन्तुं तानात्मनो द्विषः ॥ ६६ ॥
ते पोतनपुरं प्राप्ताः प्रहरन्तोऽर्यनोदिताः ।
लीलयैव जिताः सर्वे त्रिपृष्ठेन महौजसा ॥ ६७ ॥
प्रोक्ताश्चेदं यथाऽऽख्येयं खरग्रीवस्य तस्य भोः ।
चेच्छूरोऽसि तदाख्हि रथावर्त्तेऽस्तु नौ समित् ॥ ६८ ॥
तैश्च गत्वा तथाऽऽख्याते स विद्याधरसैन्ययुक् ।
तत्राययौ त्रिपृष्ठश्च [1]ससैन्यं श्वशुरालये ॥ ६९ ॥

---

(१) ख घ ससैन्यः ।

ततोऽयसैन्ययोर्युद्धे जाते विद्याधरैः कृताः ।
रक्तोव्याघ्रपिशाचाद्याः हिंस्राः परविनाशकाः ॥ ७० ॥
त्रिपृष्ठसेना तद्भीता पलायिष्ट ततः स्वयम् ।
डुढौके खेचरैर्योद्धुं रथारूढोऽचलानुजः ॥ ७१ ॥
शङ्खं च पूरयामास तन्नादेन निजं बलम् ।
युद्धसज्जं पुनरभूत् परानीकं च विद्रुतम् ॥ ७२ ॥
डुढौके स्वयमश्वोऽपि योद्धुं स्यन्दनसंस्थितः ।
त्रिपृष्ठेन समं सिंहः शरभेणेव सत्वरम् ॥ ७३ ॥
दिव्यास्त्रैर्युयुधे सोऽथ त्रिपृष्ठस्तानि लीलया ।
सर्वाण्युच्छेदयामास तमांसीव विकर्त्तनः ॥ ७४ ॥
ततश्च सोऽमुचच्चक्रं त्रिपृष्ठाय भयावहम् ।
तच्च वक्षसि तुम्बेन प्राजापत्यमताडयत् ॥ ७५ ॥
स्थितं तत्रैव तदथोपादाय तमुवाच सः ।
कृत्वा मम नमस्कारं रे [1]स्वमारं निवारय ॥ ७६ ॥
अश्वग्रीवोऽवदन्मृत्युर्वरं वैरिप्रणामतः ।
तन्मुञ्च चक्रं को वक्रं दैवं नामानुकूलयेत् ॥ ७७ ॥
ततो मुक्तं त्रिपृष्ठेन च्छित्त्वा तस्य शिरोधराम् ।
पुनरागात् त्रिपृष्ठस्य समीपेऽसौ सुदर्शनम् ॥ ७८ ॥
प्रथमो वासुदेवोऽयमुत्पन्न इति वादिनः ।
उपरिष्टात् त्रिपृष्ठस्य पुष्पवृष्टिं व्यधुः सुराः ॥ ७९ ॥

---

(१) ग ङ -मारिम् ।

ततोऽसौ साधयामास भरतार्द्धमहीपतीन् ।
बभ्रे कोटिशिलां वामभुजाग्रेण च लवत् ॥ ८० ॥
वासुदेवाभिषेकोऽस्य चक्रे भूचरखेचरैः ।
तेन चाकारि ज्वलनजटी विद्याधराधिपः ॥ ८१ ॥
अर्ककीर्तेस्तथा ज्योतिर्माला विद्युत्प्रभस्समा ।
बभूव गेहिनी रम्या त्रिपृष्ठस्यैव शासनात् ॥ ८२ ॥
ययौ निजपुरं सोऽथ तस्य चात्यन्तवल्लभा ।
षोडशस्त्रीसहस्राणां मुख्या साऽभूत् स्वयंप्रभा ॥ ८३ ॥
इतः श्रीषेणजीवोऽसौ च्युत्वा सौधर्मकल्पतः ।
ज्योतिर्मालाकुक्षिसरस्यवातारीन्मरालवत् ॥ ८४ ॥
दृष्टोऽमितप्रभाव्याप्तसूरस्वप्नोऽम्बया तदा ।
जज्ञे च समये पुत्रोऽमिततेजोऽभिधोदितः ॥ ८५ ॥
अर्ककीर्त्तिः पिता सोऽथ परिव्रज्यामुपाददे ।
अभिनन्दनाभिधानस्यानगारस्य सन्निधौ ॥ ८६ ॥
जीवोऽथ सत्यभामायाश्च्युत्वा प्रथमकल्पतः ।
ज्योतिर्मालोदरे जाताऽर्ककीर्त्तेस्तनयाऽभवत् ॥ ८७ ॥
सुताराराजनीस्वप्नदर्शनात् साऽभिधीयते ।
सुतारेति सुताराक्षी चारुताराक्षशोभिता ॥ ८८ ॥
जीवोऽभिनन्दितायाश्च स्वर्गाच्च्युत्वाऽऽयुषः क्षये ।
देव्यां स्वयंप्रभानाम्न्यां त्रिपृष्ठस्य सुतोऽभवत् ॥ ८९ ॥
अभिषेको महालक्ष्म्या दृष्टः स्वप्ने यदम्बया ।
तेन श्रीविजयो नाम तस्य जज्ञे मनोरमम् ॥ ९० ॥

अपरोऽपि त्रिपृष्ठस्य विष्णोरजनि नन्दनः ।
स्वयंप्रभाप्रसूतो विजयभद्रोऽभिधानतः ॥ ९१ ॥
स सिंहनन्दिताजीवः सौधर्मत्रिदिवच्युतः ।
जज्ञे ज्योतिःप्रभानाम्नी त्रिपृष्ठस्यैव नन्दिनी ॥ ९२ ॥
अकार्यैत्यन्तचार्वङ्ग्याः कृते तस्याः स्वयंवरः ।
विष्णुना दूतवदनैराहूताः [1]सुमहौजसः ॥ ९३ ॥
अथार्ककीर्त्तिनाऽमात्यः प्रेषितः [2]केशवान्तिकम् ।
स एत्य विष्णुमानम्य व्याजहार कृताञ्जलिः ॥ ९४ ॥
देव मत्स्वामिनः पुत्री सुताराऽपि निजेच्छया ।
वृणुते वरमत्रैव समागत्य त्वदाज्ञया ॥ ९५ ॥
हृष्टोऽभाषिष्ट गोविन्दो भवत्वेवं किमत्र भोः ।
वाच्यं यदर्ककीर्त्तेश्च ममावासस्य नान्तरम् ॥ ९६ ॥
ततः पुत्रीमुपादायामिततेजःसुतान्वितः ।
तत्रायययावर्ककीर्त्तिः पूजितो विष्णुनाऽथ सः ॥ ९७ ॥
अकारयत् त्रिपृष्ठोऽथ स्वयंवरणमण्डपम् ।
[4]मञ्चाननेकशस्तत्र नामाङ्कान्यासनानि च ॥ ९८ ॥
ततस्ते पार्थिवास्तेष्वासनेषु न्यषदन् क्रमात् ।
तेषां च मध्ये तौ विष्णुबलभद्रौ निषेदतुः ॥ ९९ ॥

---

(१) ख, घ -श्रुतः ।
(२) ख, घ, ङ -स्तु ।
(३) ग, ङ केशवान्तिकं ।
(४) ङ, च मञ्चान्य- ।

अत्रान्तरे कृतस्नाने श्वेतवासोऽतिशोभने ।
श्वेताङ्गरागपुष्पाढ्ये विशालशिबिकास्थिते ॥ १०० ॥
चामराभ्यां वीज्यमाने देव्याविव धरागते ।
ज्योतिःप्रभासुतारे ते कन्ये तत्रेयतुः शुभे ॥ १ ॥ (युग्मम्)
शिबिकायाः समुत्तीर्य स्वयंवरसदोगते ।
ते प्रेक्षांचक्रिरे भूपाः पुराऽदृष्टाङ्गना इव ॥ २ ॥
निरीक्ष्य निखिलान् राज्ञोऽमिततेजोगलेऽक्षिपत् ।
ज्योतिःप्रभा वरमालामन्या श्रीविजयस्य तु ॥ ३ ॥
अहो साधु कृतं साधु कृतमित्युच्चकैर्जगुः ।
हृष्टांचित्ता महीपाला भूचराः खेचरा अपि ॥ ४ ॥
त्रिपृष्ठश्चार्ककीर्त्तिश्च तान्सत्कृत्य विसृज्य च ।
कारयामासतुः प्रीतौ विवाहं स्वस्वकन्ययोः ॥ ५ ॥
अर्ककीर्त्तिरथो ज्योतिःप्रभामादाय स्वस्नुषाम् ।
मुक्त्वा सुतारां ससुतोऽप्याजगाम निजं पुरम् ॥ ६ ॥
विरक्तचित्तः सोऽन्येद्युर्दत्त्वा राज्यं स्वसूनवे ।
पितुर्दीक्षाप्रदस्यैव मुनेः पार्श्वेऽग्रहीद्व्रतम् ॥ ७ ॥
त्रिपृष्ठे वासुदेवेऽथ परलोकं गते सति ।
सूरिः सुवर्णकुम्भाख्यः पोतनेऽन्येद्युराययौ ॥ ८ ॥
श्रेयांसजिनशिष्यं तं परिवारसमन्वितम् ।
प्रययौ नन्तुमुद्याने बलभद्रोऽचलाभिधः ॥ ९ ॥

---

(१) ग ङ -भिशोभिते ।

तत्राचार्यं नमस्कृत्योपविश्य च यथास्थिति ।
शुश्राव देशनां तस्य मोहनिद्राविनाशनीम् ॥ १० ॥
प्रप्रच्छावसरे चैवं भगवन् विश्वविश्रुतः ।
मत्तनिष्ठो गुणैर्ज्येष्ठस्त्विपृष्ठः कां गतिं गतः ॥ ११ ॥
सूरिरूचे स नृशंसः पञ्चेन्द्रियवधे रतः ।
महारम्भपरो मृत्वा सप्तमं नरकं ययौ ॥ १२ ॥
तच्छ्रुत्वा विललापैवमचलः स्नेहमोहितः ।
हा विश्ववीर हा धीर किं तेऽभूद्दृतिरीदृशी ॥ १३ ॥
गुरुणोक्तं मा विषीद शृणु पूर्वजिनोदितम् ।
यदस्य चरमो जीवो भविताऽत्र जिनेश्वरः ॥ १४ ॥
ततः श्रीविजयं राज्ये यौवराज्येऽपरं सुतम् ।
निवेश्य बलभद्रोऽस्य गुरोः पार्श्वेऽग्रहीद्व्रतम् ॥ १५ ॥
राज्ञः श्रीविजयस्याथ राज्यं पालयतः सतः ।
सभास्थस्यान्यदाऽऽगत्य प्रतीहारो व्यजिज्ञपत् ॥ १६ ॥
प्रभो त्वन्मन्दिरद्वारे त्वद्दर्शनसमुत्सुकः ।
अस्ति नैमित्तिको नाम स आयातु प्रयातु वा ॥ १७ ॥
ततो राज्ञोऽनुमत्याऽसौ तेनानीतः सभान्तरे ।
दत्त्वाऽऽशीर्वचनं तस्मै यथासनमुपाविशत् ॥ १८ ॥
राजा प्रोवाच ज्ञानेन यत्पश्यसि शुभाशुभम् ।
तत्त्वं ब्रूहि निमित्तज्ञ करे यत्तेऽस्ति पुस्तिका ॥ १९ ॥
सोऽवदद्देव पश्यामि यदहं निजब्रह्मणा ।
तदहक्कुमपि नो शक्यं कथयते तु त्वदाज्ञया ॥ २० ॥

यदितः सप्तमे घस्रे पोतनाधिपतेर्ननु ।
निपतिष्यत्यचिरांशुः शीर्षोपरि न संशयः ॥ २१ ॥
तच्छ्रुत्वा परिषद्ज्याहतेवाभूत्सुदुःखिता ।
भणितश्च कुमारेण गाढकोपपरेण सः ॥ २२ ॥
पतिष्यति यदा विद्युत् रे पोतनपुरेशितुः ।
पतिष्यति तदा शीर्षे त्वदीये किं नु दुर्मते ॥ २३ ॥
नैमित्तिकोऽवदन्मह्यं त्वं कुप्यसि कुमार किम् ।
यदत्र दृष्टं [1]संज्ञाने भवेत्तज्ज्ञातु नान्यथा ॥ २४ ॥
वस्त्राभरणरत्नानां वृष्टिर्मम भविष्यति ।
राज्ञा प्रोचे त्वया ह्येतन्निमित्तं शिक्षितं कुतः ॥ २५ ॥
सोऽब्रवीद्बलदेवस्य दीक्षाकाले मयाऽपि हि ।
प्रव्रज्या प्रतिपन्नाऽऽसीत्कियत्कालं च पालिता ॥ २६ ॥
अधीतं च तदा शास्त्रमेत[2]द्येन भणाम्यहम् ।
सर्वज्ञशासनमृते सम्यग् ज्ञानं न विद्यते ॥ २७ ॥
पश्चाच्च विषयाशक्तोऽभूवं राजन् पुनर्गृही ।
धनार्थमेहागतोऽस्मि कृतदारपरिग्रहः ॥ २८ ॥
ज्ञात्वा सत्यं निमित्तं तत् राजलोकोऽखिलस्तदा ।
स्वस्वामिरक्षणोपायचिन्तया व्याकुलोऽभवत् ॥ २९ ॥
तत्रैको न्यगदन्मन्त्री यत् स्वामी सप्त वासरान् ।
यानारूढः समुद्रान्तर्ध्रियतेऽतिप्रयत्नतः ॥ ३० ॥
द्वितीयः स्माह पानीये विद्युद्यद्यपि न स्फुरेत् ।

(१) ङ सज्ज्ञाने । (२) ख, घ, च -देव ।

तथाऽपि यानपात्रे तां पतन्तीं को निवारयेत् ॥ ३१ ॥
तस्माद्वैताढ्यशैलस्यातिगूढे कन्दराग्रहे ।
प्रक्षिप्य रक्ष्यते स्वामी विद्युत्पातभयाल्किल ॥ ३२ ॥
तृतीयोऽप्यवदन्नायमुपायोऽपि शुभावहः ।
प्रत्युतापायहेतुः स्यात् दृष्टान्तोऽत्र निशम्यताम् ॥ ३३ ॥
बभूव विजयपुरे रुद्रसोमाभिधो द्विजः ।
तद्भार्या ज्वलनशिखा शिखी नाम्ना तयोः सुतः ॥ ३४ ॥
तस्मिंश्च नगरे कश्चित् राक्षसो मांसलोलुपः ।
भूरि मानुषरूपाणि मारयामास प्रत्यहम् ॥ ३५ ॥
एकैकं मानुषं तेऽहं दास्यामीवं वधीः स्म मा ।
सह तेन व्यवस्थेति कृता तत्पुरभूभुजा ॥ ३६ ॥
चक्रे च सर्वपौराणां नामान्तर्गतगोलकान् ।
तन्मध्यान्नित्यमेकैकमाकृष्याख्यां निरीक्ष्यते ॥ ३७ ॥
यस्मिन् दिने च यन्नाम दृश्यते तत्र निर्गतम् ।
स तस्मै दीयते तस्य शेषरक्षाविधित्सया ॥ ३८ ॥
अन्येद्युर्द्विजपुत्रस्य तस्य नाम विनिर्ययौ ।
तच्छ्रुत्वा जननी तस्याक्रन्दं चक्रे सुदुःखिता ॥ ३९ ॥
तस्याः क्रन्दितमाकर्ण्य तत्रासन्नगृहस्थितैः ।
भूतैः साऽभाणि सदयैः खेदं हे अम्ब मा कृथाः ॥ ४० ॥
भविष्यति यदा दत्तो [1]राक्षसाय सुतस्तव ।
आनेष्यामस्तदा हृत्वा तमवश्यं तवान्तिकम् ॥ ४१ ॥

(१) ग, ङ राक्षसस्य ।

इत्युक्ता मुदिता साऽभूत् तत्पुत्रः सोऽथ भूभुजा ।
प्रदत्तो रक्षसे तस्माद्भूतैरपि[1] हृतश्च तैः ॥ ४२ ॥
समर्पितश्च तन्मातुस्तया तन्मृत्युभीतया ।
स पर्वतगुहामध्ये क्षेपित्वा पिदधे तया ॥ ४३ ॥
तत्राप्यजगरेणायं तत्स्थेन गिलितो निशि ।
न शक्यमन्यथा कर्तुं कर्म केनापि देहिनाम् ॥ ४४ ॥
तस्मादवश्यंभावी हि योऽसौ भावो भविष्यति ।
किन्तु दुरितोपशान्त्यै करिष्यामस्तपो वयम् ॥ ४५ ॥
मन्त्र्यवादीच्चतुर्थोऽथ सत्यमेतेन भाषितम् ।
किन्तु यद्दर्तते चित्ते मम तत्कथयामि वः ॥ ४६ ॥
पोतनाधिपतेर्मूर्ध्नि विद्युत्पातोऽसुनोदितः ।
नैमित्तिकेन न पुना राज्ञः श्रीविजयस्य भोः ॥ ४७ ॥
ततः सप्त दिनान्यत्रापरः स्वामी विधीयते ।
नैमित्तिकोऽपि तद्वाक्यं प्राशंसत्साधु साध्विति ॥ ४८ ॥
उवाच चास्य कार्यस्य कथनार्थमिहागमम् ।
इदं च क्रियतां किन्तु किमन्यैर्दुर्विचिन्तितैः ॥ ४९ ॥
राजा जिनालयस्यान्तस्तपोनियमतत्परः ।
तिष्ठत्वेष यतो ह्यापन्नश्यति सुमहत्यपि ॥ ५० ॥
राज्ञोचे यस्य कस्यैव स्वामित्वं हि विधास्यते ।
सोऽपि यास्यति पञ्चत्वं तदेवं क्रियते कथम् ॥ ५१ ॥

---

(१) ग -पहृतश्च ।

ऊचुश्च मन्त्रिणः स्वामिन् यद्येतत्संमतं तव ।
तदाभिषेको यक्षस्य प्रतिमाया विधास्यते ॥ ५२ ॥
चेद्दैवतानुभावेन न स्यादापत्ततो वरम् ।
नो चेत्काष्ठमयी यक्षप्रतिमैव विनश्यति ॥ ५३ ॥
राजाऽथ युक्तमित्युक्त्वा गत्वा च जिनमन्दिरे ।
सर्वान्तःपुरसंयुक्तः प्रपेदे पौषधव्रतम् ॥ ५४ ॥
संस्तारकनिषण्णश्च तपोनियमसंयमैः ।
पूतात्मा मुनिवत्तस्थौ नमस्कारपरायणः ॥ ५५ ॥
अन्ये च मन्त्रिसामन्तप्रमुखाः भूपतेः पदे ।
निवेश्य यक्षप्रतिमां तस्थुस्तस्याः समीपगाः ॥ ५६ ॥
ततः सप्तमे घस्रेऽब्दैः क्षणाद् व्याप्तं नभस्तलम् ।
ववर्ष च घनो गर्जारवव्याप्तदिगन्तरः ॥ ५७ ॥
मुहुर्विद्योतमानोऽथ विद्युद्दण्डस्तथाऽपतत् ।
तस्मिन्नेव यक्षबिम्बे निर्भाग्ये यमदण्डवत् ॥ ५८ ॥
तच्चोपसर्गे तेनैव विधिना प्रलयं गते ।
नैमित्तिकगिरा राजा पुनरागान्निजं गृहम् ॥ ५९ ॥
सर्वान्तःपुरनारीभिर्हृष्टचित्ताभिरर्चितः ।
वस्त्रालङ्काररत्नौघैः स नैमित्तिकपुङ्गवः ॥ ६० ॥
राज्ञाऽपि भूरि द्रव्येणार्चितो विससृजे च सः ।
यक्षस्य प्रतिमा रत्नमयी नव्या च कारिता ॥ ६१ ॥
पूजा च जिनबिम्बानां श्रेयःसन्ततिकारिणी ।
राज्ये पुनर्जन्मनीव स्वस्याकारि तथोत्सवः ॥ ६२ ॥

सोऽथ श्रीविजयो राजा समं देव्या सुतारया ।
ययौ क्रीडार्थमन्येद्युर्वनं ज्योतिर्वनाभिधम् ॥ ६३ ॥
तत्र भर्त्रा सहाद्रीणां छायावत् सुतलेषु सा ।
विहरन्ती ददर्शैकं सुतारेणं मनोहरम् ॥ ६४ ॥
कुरङ्गं स्वर्णवर्णाङ्गं तं विलोक्य सुलोचनम् ।
सोचे स्वपतिमानीय नाथैनं त्वं समार्पय ॥ ६५ ॥
तद्ग्रहार्थं स्वयं राजा स्वप्रियास्नेहमोहितः ।
दधावे सोऽपि वेगेनोत्पत्येयाय नभस्तलम् ॥ ६६ ॥
अत्रान्तरेऽस्य प्रियया दृष्टया कुक्कुटाहिना ।
एह्येहि लघु हे नाथेति पूच्चक्रे गुरुस्वरम् ॥ ६७ ॥
तदाकर्ण्य झटित्येव विनिवृत्तो महीपतिः ।
ददर्शैनां विलपन्तीं विषवेदनयाऽर्दिताम् ॥ ६८ ॥
ततः प्रयुक्ता वेगेन मन्त्रतन्त्रादिका क्रिया ।
साऽप्यभून्निष्फला क्षेत्रे क्षिप्तं बीजमिवोषरे ॥ ६९ ॥
क्षणान्तरेण सा देवी म्लानास्या मीलितेक्षणा ।
पश्यतोऽपि महीभर्तुर्बभूव गतजीविता ॥ ७० ॥
ततो मुमूर्च्छ भूपालः पपात च महीतले ।
कथञ्चिल्लब्धसंज्ञः सन् स एवं विललाप च ॥ ७१ ॥
हा गीर्वाणप्रियाकारे महोदारे विवेकिनि ।
हा सुतारे गुणाधारे प्रीतिसारे क्व तिष्ठसि ॥ ७२ ॥
एवं विलप्य बहुधा राजाऽभून्मरणोद्यतः ।
वृत्तान्तं ज्ञापितश्चामुं राजलोकः पदातिभिः ॥ ७३ ॥

राज्ञः स्वयंप्रभा माता भ्राता च विजयाह्वयः ।
तच्छ्रुत्वा दुःखितौ गाढं यावदेतौ बभूवतुः ॥ ७४ ॥
नभोमार्गेण तत्रैत्य तावदेको नरोऽवदत् ।
अलं देवि विषादेन शृणु वार्त्तां स्वयंप्रभे ॥ ७५ ॥
रथनूपुरनाथेन पूजितोऽमिततेजसा ।
संभिन्नश्रोता मत्तातो नैमित्तिकवरोऽस्ति [1]हि ॥ ७६ ॥
तत्पुत्रोऽहं दीपशि[2]खोऽन्यदोर्वीं तु प्रचेलतुः ।
ज्योतिर्वनं प्रति क्रीडां कर्त्तुं तावदपश्यताम् ॥ ७७ ॥
पुरश्चमरचञ्चेशाशनिघोषेण भूभुजा ।
क्रियमाणां गतत्राणां तां सुतारां नृपप्रियाम् ॥ ७८ ॥
इत्यूचतुश्च तं दुष्ट धृष्ट दुश्चेष्ट पाप रे ।
अस्मत्स्वामिस्वसारं त्वमपहृत्य क्व यास्यसि ॥ ७९ ॥
तया च भणितावावां प्रयासेनालमत्र वाम् ।
गत्वा संबोध्यतां राजा वैतालिन्या विमोहितः ॥ ८० ॥
मर्त्तुकामस्तया सार्द्धं सुतारारूपया ततः ।
आवाभ्यां बोधितो राजा सा च दुष्टा प्रणाशिता ॥ ८१ ॥
देव्युदन्ते च विज्ञाते सोऽस्ति तत्रापणोद्यतः ।
तदाज्ञयाऽहमागां वस्तत्स्वरूपं च शंसितुम् ॥ ८२ ॥
ततः स्वयंप्रभादेव्या सत्कृतोऽसौ पुनर्ययौ ।
राज्ञः समीपं राजाऽपि ताभ्यां निन्ये स्वपत्तने ॥ ८३ ॥

---

(१) ग स्मः ।
(२) अ -खस्तदा च तौ ।

प्रतिपत्तिं विधायाथ संपृष्टोऽमिततेजसा ।
राजा श्रीविजयः सर्वं स्ववृत्तान्तं न्यवेदयत् ॥ ८४ ॥
तच्छ्रुत्वा सोऽपि संक्रुद्धोऽशनिघोषाय सत्वरम् ।
मारीचिनामकं दूतं शिक्षां दत्त्वा विसृष्टवान् ॥ ८५ ॥
गत्वा चमरचञ्चायां स दूतस्तमभाषत ।
आनीताऽस्ति त्वयाऽज्ञानात् भगिनी स्वामिनो मम ॥८६॥
राज्ञी श्रीविजयस्याहो सुतारेति सती वरा ।
अर्प्यतां साधुना शीघ्रमनर्थं माऽऽत्मनः कृथाः ॥८७॥(युग्मम्)
उवाचाशनिघोषोऽपि सगर्वोद्धरकन्धरः ।
रे दूतार्पयितुं नाम किमानीताऽस्त्यसौ मया ॥ ८८ ॥
मत्तो यः कश्चिदप्येनामनात्मज्ञो जिहीर्षति ।
दीप्ते मत्खड्गदीपेऽस्मिन् शलभत्वं स यास्यति ॥ ८९ ॥
इत्युक्त्वा ग्राहयित्वा च कण्ठे निर्वासितोऽमुना ।
स्वस्थानमगमद्दूत'स्तदर्थोऽस्य शशंस च ॥ ९० ॥
ततः श्रीविजयायादात् विद्यां शस्त्रनिवारिणीम् ।
बन्धमोचनिकां चैवामिततेजोनरेश्वरः ॥ ९१ ॥
एकैकां साधयामास स सप्तदिवसैः पृथक् ।
सिद्धविद्यस्ततश्चारिविजयाय चचाल सः ॥ ९२ ॥
कुमारा रश्मिवेगाद्याः सुता अमिततेजसः ।
अनु श्रीविजयं चेलुः शतसंख्या महौजसः ॥ ९३ ॥

---

(१) ख घ च त तदर्थस्य । ग तदार्यस्य ।

अन्यैश्च भूयः सुभटैः विद्याभुजबलोर्जितैः ।
समं श्रीविजयः प्रापाशनिघोषपुरान्तिकम् ॥ ९४ ॥
महाज्वालाभिधां विद्यां परविद्याच्छिदाकरीम् ।
ययौ साधयितुं चार्किनृपो हिमवति स्वयम् ॥ ९५ ॥
सहस्ररश्मिना ज्येष्ठपुत्रेण परिवारितः ।
तत्र मासिकभक्तेन विद्यां साधयति स्म सः ॥ ९६ ॥
इतः ससैन्यमायान्तं श्रुत्वा श्रीविजयं नृपम् ।
प्रैषीदशनिघोषः स्वान् पुत्रान् सबलवाहनान् ॥ ९७ ॥
ततः प्रवृत्ते घोरः समरः सैन्ययोस्तयोः ।
विद्याबलवतोः स्वस्वस्वामिनोर्जयकाङ्क्षिणोः ॥ ९८ ॥
विद्याजनितमायाभिर्युद्ध्यमानं सकौतुकम् ।
नाहार्यदेकमपि द्वयोर्मध्याद्बलं तयोः ॥ ९९ ॥
मासं यावत् युधं कृत्वाऽमिततेजः कुमारकैः ।
पुत्रा अशनिघोषस्य प्रौढा अपि पराजिताः ॥ २०० ॥
ततश्चाशनिघोषेऽस्मिन् युध्यमाने स्वयं रणे ।
द्रढीयांसोऽप्यभज्यन्त पुत्रास्तेऽमिततेजसः ॥ १ ॥
स्वयं श्रीविजयो राजाऽप्यढौकिष्ट रणे तदा ।
गर्ज्यन्ते नेतरैरत्तुमिच्छवः सह दन्तिभिः ॥ २ ॥
क्रुद्धः श्रीविजयः सोऽथ खड्गेनाहत्य तं द्विषम् ।
द्विधा चक्रे ततो जाताऽशनिघोषद्वयी [1]पुनः ॥ ३ ॥

---

(१) ख च ज पुरः ।

साऽपि द्विधा कृता जज्ञे ऽशनिघोषचतुष्टयी ।
एवं च खण्ड्यमानोऽसौ मायया शतधाऽभवत् ॥ ४ ॥
यावच्छ्रीविजयो राजा निर्विण्णस्तद्वधेऽभवत् ।
तावत्तत्र सिद्धविद्योऽमिततेजा स आययौ ॥ ५ ॥
अपहाय ततो मायां नश्यन्तं तद्भयेन तम् ।
दृष्ट्वाऽऽदिदेशार्किनृपो विद्यां विद्यामुखोमिति ॥ ६ ॥
दूरादप्येष पापीयाननेतव्यस्त्वया स्फुटम् ।
साऽथ तत्पृष्ठतो लग्ना ययौ सीमनगे च सः ॥ ७ ॥
तत्र श्रीवृषभस्वामिजिनमन्दिरसन्निधौ ।
उत्पन्नकेवलज्ञानं वन्द्यमानं सुरासुरैः ॥ ८ ॥
निरीक्ष्य बलदेवर्षिं स तं शरणमाश्रयत् ।
देवताऽप्यमितायाख्यद् बलित्वा तं तथास्थितम् ॥८॥(युग्मम्)
देवीं सुतारामादाय त्वमागच्छेर्ममान्तिकम् ।
इति मारीचिमाज्ञाप्य सोऽथ श्रीविजयान्वितः ॥ १० ॥
सर्वसैन्ययुतो भेरीभाङ्कारैः पूरयन् दिशः ।
बलभद्रमुनिं नन्तुं तत्र सीमनगे ययौ ॥ ११ ॥ (युग्मम्)
गत्वा जिनालये नत्वा स्तुत्वा च प्रथमं जिनम् ।
अभ्यर्ण्णे बलदेवर्षेर्जग्मतुस्तावुभावपि ॥ १२ ॥
देवीमादाय मारीचिरथागात्तत्र सत्वरम् ।
अर्पिताऽऽत्तचारित्रा राज्ञः श्रीविजयस्य सा ॥ १३ ॥
उत्थायाशनिघोषोऽथ क्षमयामास तौ नृपौ ।
संमानितश्च ताभ्यां संजातास्ते गतमत्सराः ॥ १४ ॥

अत्रान्तरे केवलिना प्रारब्धा धर्मदेशना ।
कृतभव्यजनश्रोत्रसुधापूरप्रदेशना ॥ १५ ॥

तद्यथा —

रागद्वेषवशीभूता दुराकूतास्तनूभृतः ।
नयन्त्यनर्थकं जन्म कृत्वाऽनर्थपरम्पराम् ॥ १६ ॥
न मोक्षप्रापणे शक्ता याभ्यां विहितबन्धनाः ।
रागद्वेषावमू शत्रू यूयं त्यजत भो जनाः ॥ १७ ॥
श्रुत्वा तां देशनां सम्यक् प्रतिबुद्धा नृणां गणाः ।
केचिदादिरे दीक्षां श्रावकत्वं तथाऽपरे ॥ १८ ॥
पप्रच्छाशनिघोषस्तं सुतारेयं मया प्रभो ।
रागोद्रेकं विना हृत्वा नीता निजगृहे कथम् ॥ १९ ॥
केवल्यूचे पूर्वभवे पुरे रत्नपुराभिधे ।
श्रीषेणनामा भूपोऽभूत् जीवोऽस्यामिततेजसः ॥ २० ॥
इत्यादि तद्भवान् सर्वान् कथयित्वाऽब्रवीत्पुनः ।
तदाऽभूः कपिलस्त्वं हि सत्यभामा च त्वत्प्रिया ॥ २१ ॥
सत्यभामा सुतारेयं संजाता कपिलस्तु सः ।
भवं भ्रान्त्वा मनुष्यत्वं कुले लब्ध्वा तपस्विनाम् ॥ २२ ॥
कृत्वा बालस्तपस्तत्र मृत्वाऽभूस्त्वं ततस्त्वया ।
जज्ञे पूर्वस्नसम्बन्धाद्राजन् रागं विनाऽप्यसौ ॥२३॥ (युग्मम्)
त्वय्यसौ विगतस्नेहा पुरातनभवेऽप्यभूत् ।
अतस्त्वमपि मन्दानुरागोऽस्यां हि प्रवर्त्तसे ॥ २४ ॥

स्वस्वपूर्वभवान् श्रुत्वाऽमिततेजोनृपादयः ।
हृष्टा ऊचुरहो नास्त्यसाध्यं किमपि ब्रह्मणः ॥ २५ ॥
पृष्टोऽथ केवली विद्याधरेशाऽमिततेजसा ।
भव्योऽहमथवाऽभव्यः प्रभो मे कथ्तामिति ॥ २६ ॥
केवल्यूचे नवमे त्वं भवे राजन्नितो भवात् ।
भविष्यस्यत्र भरते पञ्चमः सार्वभौमराट् ॥ २७ ॥
षोडशश्च जिनेन्द्रोऽयं राजा श्रीविजयः पुनः ।
पुत्रो भूत्वा गणधरस्तवैवाद्यो भविष्यति ॥ २८ ॥
पृष्ट्वा श्रुत्वा ततस्तस्य पार्श्वे केवलिनो मुनेः ।
सम्यक्त्वमूलः सुश्राद्धधर्मस्ताभ्यामुपाददे ॥ २९ ॥
संस्थाप्य स्वात्मजं राज्येऽशनिघोषो विरक्तधीः ।
तस्य केवलिनः पार्श्वे प्रव्रज्यां समुपाददे ॥ ३० ॥
राज्ञः श्रीविजयस्याम्बा देवी सा च स्वयंप्रभा ।
तत्पादान्ते प्रवव्राज भूरिनारीसमन्विता ॥ ३१ ॥
अथ केवलिनं नत्वा स्वपरीवारसंयुतौ ।
स्वं स्वं स्थानं जग्मतुः श्रीविजयामिततेजसौ ॥ ३२ ॥
देवपूजागुरूपास्तितपःप्रभृतिकर्मभिः ।
द्योतयन्तौ श्रावकत्वं तौ कालमतिनिन्यतुः ॥ ३३ ॥
पुण्यात्माऽमिततेजाश्च[1] स प्रासादमकारयत् ।
पञ्चवर्णवररत्ननिर्मितं जिनमन्दिरम् ॥ ३४ ॥
अन्यदा तत्समीपेऽसौ कारिते पौषधालये ।

(१) घ ण -: स प्रासादान्तरकारयत् ।

आसीनो धर्ममाचष्टे विद्याधरसभान्तरे ॥ ३५ ॥
अत्रान्तरे चारणर्षिद्वितयं नभसा व्रजन् ।
सनातनजिनान्नन्तुं तं ददर्श जिनालयम् ॥ ३६ ॥
तच्चैत्यवन्दनाहेतोरवतीर्णौ ततश्च तौ ।
उपवेश्यासने राज्ञा वन्दितौ भक्तिपूर्वकम् ॥ ३७ ॥
तत्रैकः साधुराचख्यौ राजन् जानासि चेत्स्वयम् ।
तथापि धर्ममाख्यातुमुचितो नस्ततः शृणु ॥ ३८ ॥
मानुष्यकादिसामग्रीं लब्ध्वा ज्ञात्वा भवस्थितिम् ।
धर्मो निरन्तरं कार्यो निरन्तरसुखार्थिभिः ॥ ३९ ॥
मनसाऽप्यन्तरे तस्य कृते स्यात्सुखमन्तरा ।
जातं मत्स्योदराख्यस्य धनदस्येव निश्चितम् ॥ ४० ॥
पृच्छति स्म ततो राजा भक्तिभाक् रचिताञ्जलिः ।
मुने मत्स्योदरः कोऽयं कथ्यतां तत्कथा मम ॥ ४१ ॥
मुनिरूचेऽत्र भरतक्षेत्रे त्रिदशपूःसमम् ।
विख्यातमस्ति कनकपुरं नाम पुरं भुवि ॥ ४२ ॥
द्विषत्कोपानलप्रौढीकृततेजाः सुवर्णवत् ।
बभूव तत्र कनकरथो नाम्ना महीपतिः ॥ ४३ ॥
तस्याग्रमहिषी रूपसम्पदा रतिजित्वरी ।
कनकश्रीर्विनयादिगुणैर्नारीवराऽभवत् ॥ ४४ ॥
औदार्यादिगुणाधारो रत्नसारोऽभिधानतः ।
अभूत्तत्र राजमान्यः [1]श्रेष्ठी धर्मिष्ठधुर्यकः ॥ ४५ ॥

(१) घ श्रेष्ठीशो धर्मधुर्यकः ।

अनर्घ्यशीलरत्नाढ्या रत्नचूलेति तस्य तु ।
जज्ञे प्रिया प्रियालापा लज्जादिस्त्रीगुणान्विता ॥ ४६ ॥
अभिमानधनो धीमान् धर्मोपार्जनतत्परः ।
तयोः पुत्रः कलापात्रं बभूव धनदाभिधः ॥ ४७ ॥
इतश्च तस्मिन्नगरे कितवः सिंहलाभिधः ।
रेमे कपर्दकैर्नित्यं पुरदेव्या निकेतने ॥ ४८ ॥
स द्यूतक्रीडया नित्यं तावदेवार्जयद्धनम् ।
कदर्यभोजनं किञ्चित् यावन्मात्रेण जायते ॥ ४९ ॥
अन्यदा मन्दभाग्यत्वात् स जिगाय न किञ्चन ।
ततश्च दुष्टधीरुष्टो देवतामित्यभाषत ॥ ५० ॥
तव देवकुले नित्यं रममाणस्य मे न यत् ।
द्रव्यं सम्पद्यते तत्ते विक्रिया कटपूतने ॥ ५१ ॥
तदद्य प्रकटीभूय द्रव्यं किञ्चित्प्रयच्छ मे ।
अन्यथाऽहं करिष्यामि तवानर्थं महत्तरम् ॥ ५२ ॥
देवतोवाच रे दुष्ट त्वत्पित्रा किं त्वयाऽथवा ।
द्रव्यमस्म्यर्पितं मे यत् याचसे सहसैव तत् ॥ ५३ ॥
ततः पाषाणमुद्यम्य[1] सोऽवोचद्देहि मे धनम् ।
कुतोऽप्यानीय नोचेत्त्वां [2]व्यङ्गयिष्यामि निश्चितम् ॥ ५४ ॥
दध्यौ च देवता नास्याकृत्यं किञ्चिन्न विद्यते ।
दत्तेनैव धनेनायं तुष्येन्नह्यन्यथा पुनः ॥ ५५ ॥

---

(१) घ ञ -सुत्याद्य ।
(२) ज भङ्गयिष्यामि ।

ततो गाथासनाथं सा पत्रं तस्यार्पयत्करे ।
सोऽवदत्पत्रखण्डेन रे रण्डे किं करोम्यहम् ॥ ५६ ॥
देवतोवाच गाथेयं विक्रेतव्या त्वया खलु ।
दीनाराणां सहस्रं हि लप्स्यसे त्वं ममाज्ञया ॥ ५७ ॥
तत्पत्रं तद्गिराऽऽदाय वीथीमध्ये ययावसौ ।
इत्युवाच च गाथेयं लभ्यतां गृह्यतामहो ॥ ५८ ॥
तद्दस्वसारमालोक्य वणिग्भिर्जातकौतुकैः ।
पृष्टो मूल्यमयाचिष्ट स दीनारसहस्रकम् ॥ ५९ ॥
तदसम्भाव्यमूल्यत्वादगृह्णति जनेऽखिले ।
श्रेष्ठिपुत्रस्य तस्याट्टे स ययौ क्रमयोगतः ॥ ६० ॥
तस्यार्पितेन तन्मूल्यमाख्यातं सोऽथ पत्रकम् ।
गृहीत्वा वाचयामास गाथां तल्लिखितामिति ॥ ६१ ॥
[1]जं किरि*विहिणा लिहियं तं चिय परिणमइ सयललोयस्स ।
इय भाविऊण[†] धीरा विहुरेवि न कायरा हुंति ॥ ६२ ॥

---

(१) यत् किल विधिना लिखितं तदेव परिणमति सकललोके ।
इति भावयित्वा धीरा विधुरेऽपि न कातरा भवन्ति ॥

* क ख च ज ड चिय । † क ख ग च जाणेवि णु ।

श्रीमुनिदेवसूरयः स्वकृतपद्यशान्तिनाथचरित्रे संस्कृतबद्धां इमां गाथां एवं लिलिखुः –

विधिना लिखितं यत्तच्चृणां परिणमत्यलम् ।
धीरा भवन्ति ज्ञात्वैवं विधुरेऽपि न कातराः ॥
(सर्ग २ श्लो० १६७)

दध्यौ धन्योऽथ गाथेयं लक्षेणापि न लभ्यते ।
दीनाराणां सहस्रेण समर्घा गृह्यते ततः ॥ ६३ ॥
तद् याचितमथो तस्मै दत्त्वा मूल्यं महामतिः ।
स्वीकृत्य पत्रकं तच्च मुहुर्मुहुरवाचयत् ॥ ६४ ॥
अत्रान्तरे पिता तस्य तत्रागात्तमभाषत ।
त्वया व्यवहृतं किञ्चित् अद्य नोवेति शंस मे ॥ ६५ ॥
प्रत्यासन्नवणिग्पुत्रैः सहासैरिति जल्पितम् ।
श्रेष्ठिंस्तव पुत्रेणाद्य व्यवहारः कृतो महान् ॥ ६६ ॥
दीनाराणां सहस्रेण यदेकाऽग्राहि गाथिका ।
वर्द्धयिष्यत्यसौ लक्ष्मीं वाणिज्यकलयाऽनया ॥ ६७ ॥
रुष्टः श्रेष्ठाप्यभाषिष्ट त्वमितो याहि दुष्ट रे ।
शून्यैव हि वरं शाला पूरिता नतु तस्करैः ॥ ६८ ॥
एवं विमानतां प्राप्तो धनदोऽपि तदाऽऽपणात् ।
उत्थाय निर्ययौ चित्ते गाथार्थं तं विचिन्तयन् ॥ ६९ ॥
पुरान्निस्त्य कौबेर्य्यां दिश्यासन्नवनान्तरे ।
दिनावसानसमये प्राप्तो मानधनो हि सः ॥ ७० ॥
गम्भीरं सरसं स्वच्छं महत्तं सत्त्वशोभितम् ।
दृष्टं सरोवरं तेन तत्रैकं साधुचित्तवत् ॥ ७१ ॥
तत्र स्नात्वाऽम्बु पीत्वा च न्यग्रोधस्य तरोस्तले ।
तस्यासन्ने स सुष्वाप रात्रौ तत्पत्रसंस्तरे ॥ ७२ ॥
अत्रान्तरे च तत्रागात् व्याध एको धनुर्द्धरः ।
हन्तुं वनचरान् जीवान् जलपानार्थमागतान् ॥ ७३ ॥

ईषन्निद्रायमाणेऽथ सचिन्ते श्रेष्ठिनन्दने ।
जङ्घे चलयति स्वाङ्गं शुष्कपत्रभवो ध्वनिः ॥ ७४ ॥
अयं वनचरो जीवः कोऽपि यातीति लुब्धकः ।
विव्याधैनं शरेणांङ्घ्रौ हृदीवासज्जनो गिरा ॥ ७५ ॥
वेध्यं विद्धमिति व्याधस्तत्समीपमुपागमत् ।
धनदोऽपि प्रहारार्त्तो गाथामुच्चरति स्म ताम् ॥ ७६ ॥
तच्छ्रुत्वा लुब्धको दध्यौ हा मया मूढचेतसा ।
निर्विषः पथिकः कोऽपि सुप्तो बाणेन ताडितः ॥ ७७ ॥
ऊचे च भद्र कुत्राङ्गे मया विद्धोऽस्यजानता ।
इत्युदित्वा तस्य पादादाचकर्ष स सायकम् ॥ ७८ ॥
पट्टबन्धं व्रणे तत्र कुर्वाणं तं न्यवारयत् ।
निजं स्थानं प्रयाहीति धनदो विससर्ज्ज तम् ॥ ७९ ॥
निर्गच्छति व्रणाद्रक्ते जाते च रजनीक्षये ।
भारण्डपक्षिणा निन्ये स संस्थितधियाऽम्बरे ॥ ८० ॥
मुक्ताऽथ वारिधेर्मध्यद्वीपे खादितुमुद्यतः ।
जीवन्तं तं च विज्ञाय ययावुड्डीय पक्ष्यसौ ॥ ८१ ॥
उत्थाय धनदो यावत् ऐक्षताशाः समन्ततः ।
तावत्तत्राटवीं भीमामपश्यन्मानुषोज्झिताम् ॥ ८२ ॥
दध्यौ च क्व पुरं तन्मे क्व चेयं भीषणाऽटवी ।
अथवा चिन्तया मेऽलं दैवचिन्ता बलीयसी ॥ ८३ ॥
क्षुत्तृष्णापीडितः सोऽथ भ्रमंस्तत्र फलाशया ।
ददर्शैकं पुरं शून्यं पतितावाससञ्चयम् ॥ ८४ ॥

दृष्ट्वा च कूपकं किञ्चित्कृच्छ्रादाकृष्य तज्जलम् ।
पीत्वा च वारयामास तृष्णामथ शरीरगाम् ॥ ८५ ॥
विधाय प्राणयात्रां च फलैः कदलिसंभवैः ।
पुरादपि ततो दूरं भीतभीतो ययावसौ ॥ ८६ ॥
अत्रान्तरे च मार्त्तण्डो निस्तेजा अस्तमीयिवान् ।
प्राप्ता मयाऽप्यवस्थेति धनदं बोधयन्निव ॥ ८७ ॥
अस्तं गते [1]दिवानाथे तमसा क्लेशितं जगत् ।
विशिष्टज्ञानविरहादज्ञानेनेव सर्पता ॥ ८८ ॥
गिरेः कस्यापि निकटे वह्निमुत्पाद्य दारुणा ।
तस्य तापेन निःशीतः स व्यतीयाय यामिनीम् ॥ ८९ ॥
प्रभातसमये वह्निप्रदेशोर्वीं ददर्श सः ।
जातां स्वर्णमयीं सद्यो दध्यौ चैवं सविस्मयः ॥ ९० ॥
नूनं सुवर्णद्वीपोऽयं यदियं ज्वलितानलात् ।
जातरूपमयी जाता सद्य एव वसुन्धरा ॥ ९१ ॥
पातयामि ततः [2]स्वर्णमिति ध्यात्वाऽमुना कृताः ।
[3]इष्टिकानां सुसङ्घाटाः स्वर्णीभूताश्च तेऽग्निना ॥ ९२ ॥
भ्रमन्नन्येद्युरद्राक्षीत् निकुञ्जे कुत्रचिद्गिरेः ।
रत्नजातमयं तच्चानिनाय स्वर्णसन्निधौ ॥ ९३ ॥
एवं सुवर्णरत्नानां राशिस्तेन कृतो बहुः ।
कदल्यादिफलैः प्राणयात्रां चक्रे च सोऽन्वहम् ॥ ९४ ॥

---

(१) घ ङ च ज दिवाधीशे । (३) ख च ञ मृत्तिकामयसं- ।
(२) ख च ञ स्वर्णं राशिस्तेन कृतो बहुः ।

सार्थवाहः सुदत्ताख्योऽन्यदा तद्देशमाययौ ।
याने जलेन्धनं तस्य त्रुटितं पूर्वसञ्चितम् ॥ ९५ ॥
दृष्ट्वा तं द्वीपमेतेन प्रेषिता निजपूरुषाः ।
जलेन्धनकृते तत्र ददृशुर्धनदं च ते ॥ ९६ ॥
कस्त्वं भोरित्यपृच्छंश्चावोचद्धनचरोऽस्मि सः ।
तैरुक्तस्तर्हि पानीयस्थानं किमपि दर्शय ॥ ९७ ॥
तेनासौ दर्शितस्तेषां कूपस्तेऽपि तदन्तिके ।
ददृशुस्तत्सुवर्णादि पुरा यत्तेन सञ्चितम् ॥ ९८ ॥
कस्येदमित्यपृच्छंश्च धनदं सोऽप्युवाच तान् ।
मामकीनमिदं वित्तं स्थानं नयति यस्त्वदः ॥ ९९ ॥
यच्छामि तस्य तुर्यांशमित्युक्ते सार्थपोऽपि सः ।
तत्रागाद्धनदस्तस्य प्रणामाद्यौचितिं व्यधात् ॥३००॥(युग्मम्)
सार्थवाहस्तमालिङ्ग्य पृष्ट्वा च कुशलादिकम् ।
तज्जातरूपरत्नानां नयनं प्रतिपन्नवान् ॥ १ ॥
प्रापय्य भृत्यकैस्तान्यत्तैस्वीत्रवहणे निजे ।
गणयित्वा धनदोऽपि तानि तेषां समार्पयत् ॥ २ ॥
दृष्ट्वा बहु धनं तत्र सार्थेशश्चलिताशयः ।
आदिदेश [1]निजनरान् कूपेऽसौ क्षिप्यतामिति ॥ ३ ॥
तैस्ततो धनदोऽभाणि कर्ष भोः कूपकाज्जलम् ।
वयं सम्यग्न जानीमः त्वं च तत्कृतपूर्व्यसि ॥ ४ ॥

---

(१) ख ग घ च त नरांस्तान् स्वान् ।

तत्कर्त्तुमुद्यतस्तैः स क्षिप्तः कूपे कृपोज्झितैः ।
हन्यते बन्धुरप्यर्थलुब्धैरन्यस्य का कथा ॥ ५ ॥
पर्णाच्छितायां तन्मध्ये मेखलायां पपात सः ।
नेषदप्यङ्गजा पीडा ततोऽभूत्तस्य भाग्यतः ॥ ६ ॥
गाथां तां चिन्तयन् सोऽथ कूपपार्श्वान्यलोकयत् ।
दृष्ट्वैकदेशे विवरं तत्राविक्षच्च कौतुकात् ॥ ७ ॥
चारुसोपानपङ्क्त्याऽसौ गत्वा किञ्चिदधस्ततः ।
ऋजुनैव पथा गच्छन् पश्यंश्चित्राण्यनेकशः ॥ ८ ॥
ददर्शैकं देवकुलं तस्य मध्ये प्रभावतीम् ।
तार्क्ष्यारूढां चक्रपाणिं देवीं चक्रेश्वरीं तथा ॥ ९ ॥ (युग्मम्)
नत्वा तां परया भक्त्या शीर्षे विरचिताञ्जलिः ।
एवं विज्ञापयामास धनदो वदतां वरः ॥ १० ॥
जय श्रीवृषभस्वामिजिनशासनदेवते ।
दुष्टारिष्टहरे स्तोतुः सर्वसम्पत्करे जय ॥ ११ ॥
दिष्ट्या कष्टार्दितेनाद्य हे देवि त्वं मयेक्षिता ।
भवतां तावकीनौ तच्चरणौ शरणं मम ॥ १२ ॥
तद्भक्तिमुदिता सोचे सर्वं भव्यं भविष्यति ।
अग्रे गतस्य ते वत्स मत्तोऽप्यर्थय किञ्चन ॥ १३ ॥
सोऽवदत् मयका देवि किं न प्राप्तं महीतले ।
दृष्टे त्वद्दर्शने पुण्यरहितानां सुदुर्लभे ॥ १४ ॥
ततो महाप्रभावानि पञ्चरत्नानि देवता ।
करे तस्यार्पयामास तत्प्रभावं शशंस च ॥ १५ ॥

एकं सौभाग्यकरणं द्वितीयं श्रीनिकेतनम् ।
तृतीयं रोगहृत्सद्यश्चतुर्थं विषनाशनम् ॥ १६ ॥
इदं च पञ्चमं रत्नमापत्पर्यन्तकारकम् ।
इत्युक्त्वाऽन्तर्दधे देवी धनदोऽप्यग्रतो ययौ ॥ १७ ॥
दृष्ट्वैकत्राददे संरोहिणीं चौषधिमुत्तमाम् ।
दीर्त्वा क्षुरिकया जङ्घां न्यधाद्रत्नानि तत्र च ॥ १८ ॥
संरोहिण्या महौषध्या रोहयित्वाऽथ तद्व्रणम् ।
पुरश्च गच्छन् पातालपुरमेकं ददर्श सः ॥ १९ ॥
तत्रावलोकयामास भक्ष्यभोज्यसमाकुलाः ।
मन्दिराट्टाऽऽवलीश्चित्रा मानुषैः परिवर्जिताः ॥ २० ॥
प्रदेशेऽन्यत्र सोऽद्राक्षीत् नरेन्द्रभवनं महत् ।
गवाक्षगोपुरप्रांशुप्राकारपरिशोभितम् ॥ २१ ॥
प्रविश्य कौतुकेनात्र गतः सप्तमभूमिकाम् ।
ददर्श बालिकामेकां रूपाज्जितसुराङ्गनाम् ॥ २२ ॥
तां दृष्ट्वा विस्मयापन्नं ज्ञातुकामं च तत्कथाम् ।
बभाषे कन्यका तं भोः कुतः स्थानात्त्वमागतः ॥ २३ ॥
इहागतस्य ते प्राणसंशयो भद्र वर्त्तते ।
तद् गच्छ शीघ्रमन्यत्र यावत्ते कुशलं किल ॥ २४ ॥
धनदोऽथाब्रवीत् सुभ्रु मोद्वेगं कुरु शंस मे ।
किमिदं नगरं किं वा विजनं भवती च का ॥ २५ ॥
सा तस्य धैर्यरूपाभ्यां विस्मिता पुनरब्रवीत् ।
अस्ति चेत्कौतुकं तत्त्वं शृणु सुन्दर कारणम् ॥ २६ ॥

इहास्ति भरते रम्यं नाम्ना श्रीतिलकं पुरम् ।
महेन्द्रराजो नाम्नाऽभूत्तत्र राजा पिता मम ॥ २७ ॥
अन्यदा विग्रहीतस्यान्यभूपैस्तस्य सन्निधौ ।
आगत्य व्यन्तरः कश्चित् सस्नेहं तमभाषत ॥ २८ ॥
त्वं पूर्वभवमित्रं मे तदाख्याहि करोमि किम् ।
सोऽवदत् कुरु साहाय्यं शत्रून् मम विनाशय ॥ २९ ॥
व्यन्तरोऽप्यब्रवीन्नैते शक्या हन्तुं मया सखे ।
यतो मदधिकैरेतेऽधिष्ठिता व्यन्तरैः खलु ॥ ३० ॥
करोमि किन्तु साहाय्यमित्युक्त्वा तेन मन्त्रिता ।
सपौरः सपरीवार इहानीतो झटित्यपि ॥ ३१ ॥
पुरं चाकारि तेनेदं पातालपुरनामकम् ।
प्रवेशनिर्गमावेककूपेनैवास्य सुन्दर ॥ ३२ ॥
रक्षार्थं कूपकस्यापि द्वितीयं विहितं पुरम् ।
ततः प्रवहणैरत्र नानावस्तुसमागमः ॥ ३३ ॥
एवं गच्छति कालेऽत्र राक्षसः कश्चिदन्यदा ।
कूपप्रवेशसोपानपङ्क्तिं भङ्क्त्वा समाययौ ॥ ३४ ॥
मांसलुब्धः स दुष्टात्मा प्रवृत्तः खादितुं जनान् ।
कियद्भिश्च दिनैश्चक्रे पुरमेतदमानुषम् ॥ ३५ ॥
बहिः पुरस्य लोकोऽपि तेनारब्धो निपातितुम् ।
स चाधिरुह्य यानेषु ययावन्यत्र कुत्रचित् ॥ ३६ ॥
एवं च विहिता तेन शून्येयं नगरद्वयी ।
एकैव रक्षिताऽहं तु परिणेतुं दुरात्मना ॥ ३७ ॥

इतो दिनात्सप्तमेऽहन्यतीते तेन मे पुरः ।
इति प्रोचे यथा भद्रे प्रचण्डो राक्षसोऽस्म्यहम् ॥ ३८ ॥
मानुषामिषलुब्धेन मयेहागत्य मारितः ।
नगरे निखिलो लोको रक्षिता त्वं तु कारणात् ॥ ३९ ॥
सप्तमे दिवसे लग्नं शुभग्रहनिरीक्षितम् ।
तत्र त्वां परिणेष्यामि करिष्यामि स्वगेहिनीम् ॥ ४० ॥
तदद्य सप्तमदिनं समयोऽयं तदागतेः ।
यावन्नायात्यसौ तावत् याहि त्वं सुन्दराकृते ॥ ४१ ॥
धनदः स्माह मुग्धे त्वं मा भैषीः शृणु संप्रति ।
हतः स्वपापनैवासौ मरिष्यति करेण मे ॥ ४२ ॥
सोचे तर्हि च तन्मृत्युसमयं कथयामि ते ।
पूजाकाले स विद्याया मारणीयस्त्वया खलु ॥ ४३ ॥
तस्मिंश्च समयेनासावुत्तिष्ठति न जल्पति ।
अयं च खड्गो मत्तातसत्को ग्राह्यस्त्वया तदा ॥ ४४ ॥
आगान्निशाचरः सोऽथ गृहीत्वा नृशवं करे ।
विलोक्य धनदं चाग्रे सप्रहासमदोऽवदत् ॥ ४५ ॥
अहो आश्चर्यमायातं भक्ष्यमद्य मम स्वयम् ।
इत्युदित्वाऽवज्ञयैव मुमोच मृतकं च तत् ॥ ४६ ॥
विद्यां पूजयितुं यावत् प्रवृत्तोऽसौ तदाऽमुना ।
इत्युक्तः खड्गमाकृष्य त्वां हनिष्याम्यरेऽधुना ॥ ४७ ॥
अवज्ञया हसन् सोऽथ कृतपूजो निपातितः ।
तेन खड्गेन सद्योऽपि पातयित्वा शिरो भुवि ॥ ४८ ॥

तेनैव कृतयोद्वाहसामग्र्या परिणीतवान् ।
धनदो रूपयुक्तां तां नाम्ना तिलकसुन्दरीम् ॥ ४९ ॥
भोगान् भुङ्क्ता तया सार्द्धं दिनानि कतिचित्ततः ।
तां सारवस्तु चादायाययौ तत्रैव कूपके ॥ ५० ॥
वलित्वा च समानीतं तेन वस्तु मनःप्रियम् ।
भूयश्चक्रेश्वरी मार्गे वन्दिता भक्तिपूर्वकम् ॥ ५१ ॥
आगात्प्रवहणं किञ्चित् तदा तद्द्वीपसन्निधौ ।
तस्मिंश्च कूपके तस्मान्नरा नीरार्थमाययुः ॥ ५२ ॥
रज्जुः क्षिप्ताऽथ तैस्तत्र तां धृत्वा धनदोऽवदत् ।
पतितोऽस्म्येष कूपे तत् मामुत्तारयतानघाः ॥ ५३ ॥
तैश्च तद्देवदत्तस्य सार्थवाहस्य सत्वरम् ।
आख्यातं सोऽपि तत्रागात्कौतुकात्पूर्णमानसः ॥ ५४ ॥
बद्ध्वा वरत्रया कूपे प्रक्षिप्ता मञ्चिका ततः ।
तस्यामारुह्य धनदो बहिः कूपाद्विनिर्ययौ ॥ ५५ ॥
तं दृष्ट्वा सुन्दराकारं वस्त्राभरणभूषितम् ।
अतीव विस्मितः सार्थवाहः पप्रच्छ गौरवात् ॥ ५६ ॥
कोऽसि त्वं भद्र कूपेऽत्र पतितोऽस्यथवा कथम् ।
सोऽवदन्मम भार्याऽपि पतिताऽस्त्यत्र सार्थप ॥ ५७ ॥
अन्यच्च देवतादत्तं वस्तु रत्नादिकं च [1]नः ।
कृत्वा तत्कथयिष्यामि सर्वशुद्धिं तवात्मनः ॥ ५८ ॥

---

(१) ज तत् ।

एवं कुर्वति तेनोक्तो विदधे सोऽपि तत्तथा ।
विस्मिये तु सार्थेशो दृष्ट्वा तिलकसुन्दरीम् ॥ ५८ ॥
भूयोऽपि चामुना पृष्टः शशंस धनदोऽप्यदः ।
सार्थवाह वणिक् जात्या भरतक्षेत्रवास्यहम् ॥ ६० ॥
चलितः कटाहद्वीपं प्रति यानेन सप्रियः ।
भग्नं च वारिधौ यानं ततोऽत्रागां प्रियान्वितः ॥ ६१ ॥
पतिता मत्प्रिया ह्यस्मिन् कूपे नीरेऽत्तृणाकुला ।
अहमप्यपतं चास्याः स्नेहबद्धो भवे यथा ॥ ६२ ॥
जलान्तःपतितौ नावां तत्तीरे किन्तु भाग्यतः ।
तुष्टा ददौ च रत्नानि तत्र मे जलदेवता ॥ ६३ ॥
कथितं च तयैवं यत् यानमत्र समेष्यति ।
तत्राधिरुह्य गच्छेस्त्वं निजस्थानं सुखेन भोः ॥ ६४ ॥
कथितेयं निजा वार्त्ता सार्थवाह मया [1]तव ।
त्वमप्यात्मकथां ब्रूहि यतः सख्यं प्रवर्द्धते ॥ ६५ ॥
सोऽवदद्देवदत्ताख्यो भरतादहमप्यहो ।
कटाहद्वीपमगमं चलितश्च गृहं प्रति ॥ ६६ ॥
तदेहि भद्र त्वमपि गच्छावः सममेव यत् ।
आरोपय निजं वस्तु मम याने प्रियां तथा ॥ ६७ ॥
धनदोऽप्यब्रवीदेवं कुरु सार्थपते यतः ।
षष्ठांशं ते प्रदास्यामि वस्तुनोऽस्य गृहं गतः ॥ ६८ ॥

---

(१) ख घ ङ च ततः ।

धनेन किमसारेण गौरव्योसि त्वमेव मे ।
तदुत्थारोपितं यानि सार्थेशेनेति जल्पता ॥ ६९ ॥
मार्गे [1]चागच्छतस्तस्य सार्थेशस्य दुरात्मनः ।
चचाल चित्तं ललनां तां विलोक्य धनं तथा ॥ ७० ॥
रात्रौ [2]पुरीषव्युत्सर्गनिमित्तं मञ्चिकागतः ।
प्रक्षिप्तः सार्थवाहेन धनदोऽथ महोदधौ ॥ ७१ ॥
दूरं गतेन तेनोचे धनदोऽद्यापि नैति यत् ।
गतः शरीरचिन्तार्थं तन्नूनं पतितोऽर्णवे ॥ ७२ ॥
नरैश्चान्वेषयामास तं चिरं कैतवादसौ ।
पश्चादाश्वासयामास तत्प्रियां प्रियभाषणैः ॥ ७३ ॥
अन्यस्मिंश्च दिने तेन सोचे तिलकसुन्दरी ।
संस्थितस्त्वत्पतिर्भद्रे तत्पत्नी मे भवानघे ॥ ७४ ॥
तच्छ्रुत्वा चिन्तयामास सा चैवं बुद्धिशालिनी ।
मत्पतिर्मेऽङ्गलुब्धेन नूनं व्यापादितोऽमुना ॥ ७५ ॥
ममैष शीलविध्वंसं करिष्यति बलादपि ।
ततः कृत्वोत्तरं किञ्चित्कालक्षेपोऽत्र युज्यते ॥ ७६ ॥
विचिन्त्यैवमुवाचैवं[3] संप्राप्तस्य पुरं तव ।
अनुज्ञाता महीभर्त्रा भविष्यामि गृहिण्यहम् ॥ ७७ ॥

---

(१) ग च ड ऽथा- ।
(२) ग च ड शरीरचिन्तायां- ।
(३) ग च ज -चैनं ।

हृष्टः सोऽप्यनुमेने तदिति ध्यायन् यथा नृपम् ।
तोषयित्वा [1]खदानेन करिष्यामि समीहितम् ॥ ७८ ॥
इतः स धनदत्तेन प्रक्षिप्तो जलधेर्जले ।
पूर्वभग्नस्य [2]पोतस्य लेभे खण्डं विधेर्वशात् ॥ ७९ ॥
गाढं तदुरसाऽऽश्लिष्य क्षुभ्यमाणस्तरङ्गकैः ।
पञ्चभिर्वासरैः प्राप्तः स्वपुरासन्नकूलकम् ॥ ८० ॥
हृष्टाशयो निजपुरं पश्यन्नूर्ध्वमुखो दृशा ।
गिलितो गुरुमत्स्येन फलकेन सहैव सः ॥ ८१ ॥
दध्यौ च पतितो मत्स्यजठरे नरकोपमे ।
रे जीव देवदोषेण गाथां भावयतां ततः ॥ ८२ ॥
यद्वा पूर्वभवाचीर्णकर्मदोषेण केनचित् ।
पतत्यसौख्यं मय्येव च्छिद्रं जीर्णव्रतावि व ॥ ८३ ॥
इति ध्यात्वा स सस्मार मणिमापन्निवारकम् ।
तत्प्रभावेन मत्स्योऽसौ गृहीतस्तत्र धीवरैः ॥ ८४ ॥
स्फाटिते जठरे तस्य दृष्टोऽसौ तैः सविस्मयैः ।
प्रक्षालितश्च नीरेण कथितश्च महीपतेः ॥ ८५ ॥
राजाऽपि विस्मितमनास्तमानाय्यात्मसन्निधौ ।
पप्रच्छ किमिदं भद्राघटमानं तवाऽभवत् ॥ ८६ ॥
अयि कोऽसि कथं वा त्वं पतितोऽसि झषोदरे ।
इति सत्यं ममाख्याहि वर्त्तते कौतुकं महत् ॥ ८७ ॥

---

(१) ङ सुदानेन ।
(२) ग घ ङ च यानस्य ।

धनदोऽप्यवदत्तावद्वणिग्जातिमवेहि माम् ।
भग्ने याने फलहकं संप्राप्यागामिह प्रभो ॥ ८८ ॥
निरीक्ष्यमाणो नगरं मत्स्येन गिलितोऽस्म्यहम् ।
गृहीतः स तु कैवर्तैर्जठरं चास्य दारितम् ॥ ८९ ॥
दृष्टश्च तस्य मध्येऽहं ततश्चैभिः सविस्मयैः ।
भवत्पार्श्वं समानीतो राजन्निति कथा मम ॥ ९० ॥
स्वेदच्चालितनीरेण स्नपितः सोऽथ भूभुजा ।
मत्स्योदराभिधानश्च स्थापितो निजसन्निधौ ॥ ९१ ॥
तत्प्रार्थितेन तेनासौ विदधे च स्वगीधरः ।
निनाय दिवसानेवं स्वस्वरूपमवेदयन् ॥ ९२ ॥
सुदत्तः सार्थवाहोऽथ तस्य पूर्वोपकारकृत् ।
वातप्रेरितपोतेन तत्रान्येद्युः समाययौ ॥ ९३ ॥
गृहीत्वा प्राभृतं सोऽपि प्रतीहारनिवेदितः ।
आययौ नृपतेः पार्श्वे निषण्णश्च कृताननिः ॥ ९४ ॥
राजाऽपि वणिजस्तस्य प्रियालापं स्वयं व्यधात् ।
दापयामास ताम्बूलं स्वगीधरकरेण च ॥ ९५ ॥
विज्ञाय सोऽथ तत्तस्मै ददौ भूत्वा सुखाग्रतः ।
स सुदत्तोऽपि धनदमुपलक्षयति स्म तम् ॥ ९६ ॥
परं सोऽघटमानत्वात्किञ्चित्सन्देहतत्परः ।
भणितो भूभुजा यत्तेऽर्हदानं भवतादिति ॥ ९७ ॥
महाप्रसाद इत्युक्त्वा निजस्थानं गतोऽन्यदा ।
पप्रच्छ पुरवास्तव्यं पुरुषं कञ्चिदित्यसौ ॥ ९८ ॥

अयं स्वगीधरो राज्ञः किमु भद्र क्रमागतः ।
तेनापि कथितं तस्य तत् स्वरूपं यथातथम् ॥ ९९ ॥
अत्रान्तरे च मातङ्गो गौरव्यस्तस्य भूपतेः ।
आगाद् गीतरतिर्नाम्ना सार्थवाहस्य सन्निधौ ॥ ४०० ॥
ततो गातुं प्रवृत्तोऽसौ निजवृन्दसमन्वितः ।
रञ्जितः सार्थवाहोऽपि तद्गीतकलयाऽग्रया ॥ १ ॥
दानेन तोषयित्वैनमूचे भो यदि मामकम् ।
कार्यं साधयसि त्वं तत् द्रव्यं यच्छामि ते बहु ॥ २ ॥
सोऽवदत्साधयिष्यामि सर्वं कथय मे स्फुटम् ।
वशे यस्य महीपालस्ततः किं मे सुदुष्करम् ॥ ३ ॥
सार्थवाहोऽब्रवीत्तर्हि त्वयैकान्ते महीपतिः ।
एवं वाच्यो यथा मत्स्योदरोऽयं मम बान्धवः ॥ ४ ॥
अङ्गीकृतेऽथ तत्कार्ये स तस्मै प्रीतमानसः ।
सङ्घाटांश्चतुरः स्वर्णेष्टिकानां प्रददौ सुधीः ॥ ५ ॥
ययो च नृपतेः पार्श्वे सभासीनस्य तस्य तु ।
मातङ्गोऽपि [1]समभ्येत्य पुरो गातुं प्रचक्रमे ॥ ६ ॥
तद्गीतरञ्जितो राजा स्वगीधरमवोचत ।
देहि ताम्बूलमेतस्मै गान्धर्विकवराय भोः ॥ ७ ॥
ताम्बूलं ददतस्तस्य लगित्वा कण्ठकन्दले ।
चिराद् दृष्टोऽसि हे भ्रातरिति जल्पन् रुरोद सः ॥ ८ ॥

---

(१) ग च तदाऽभ्येत्य ।

किमेतदिति भूपेन पृष्टो मत्स्योदरः सुधीः ।
हृद्युपायं विचिन्त्योचे देवायं सत्यमूचिवान् ॥ ८ ॥
अस्मिंश्च नगरे पूर्वं मातङ्गोऽभूत्पिताऽऽवयोः ।
महागायन इत्युर्वीपतेः प्रणयभाजनम् ॥ १० ॥
तस्याभूतामुभे भार्ये तयोरावां सुतौ प्रभो ।
मनागनिष्टा मे माता तदनिष्टोऽप्यहं पितुः ॥ ११ ॥
सुदीर्घदर्शिना तेन च्छिन्नानि जनकेन मे ।
जङ्घान्तः पञ्चरत्नानि तत्प्रहारश्च रोहितः ॥ १२ ॥
भणितं चेति यद्वत्स विपद्येतानि भक्षये: ।
सर्वाङ्गेष्वपि तेनास्य [1]संच्छिन्नानि घनानि तु ॥ १३ ॥
ततो विदार्य जङ्घां स्वां तानि रत्नान्यदर्शयत् ।
प्रत्ययार्थं महीभर्त्तुर्धनदो मतिमद्वरः ॥ १४ ॥
ततो गीतरतौ राजादेशाद्वृद्धा पदातिभिः ।
विदारयितुमारब्धो जजल्पैवं सुदीनवाक् ॥ १५ ॥
स्वामिन्नेष न मे भ्राता किं त्विदं कर्म गर्हितम् ।
रैदानात्सार्थवाहेन पापेना कारितोऽस्म्यहम् ॥ १६ ॥
प्रतीतिर्यदि ते देव मद्गिरा नहि जायते ।
तदानाययत स्वर्णसङ्घाटांस्तान्ममौकसः ॥ १७ ॥
राजाऽप्यालोकयामास मत्स्योदरमुखं पुनः ।
प्रत्यूचे पार्थिवं सोऽपि सत्यमेतदपि प्रभो ॥ १८ ॥

---

(१) ग च ट ड त थ सन्ति च्छिन्नानि तानि तु ।

पुनः प्रोवाच भूपालः परमार्थं निवेदय ।
मत्स्योदर महाश्चर्यकारि सर्वमिदं यतः ॥ १९ ॥
सोऽवदत्तर्हि विद्यन्ते यानेऽस्य वणिजो मम ।
सपादाष्टशतीः स्वर्णसङ्घाटानां महीपते ॥ २० ॥
पञ्चदश सहस्राणि रत्नानां च प्रभावताम् ।
इति विज्ञाय गोस्वामिन् यत्कर्त्तव्यं कुरुष्व तत् ॥ २१ ॥
अभिज्ञानमिदं चात्र यतः सर्वेऽपि सम्पुटाः ।
स्वनामाङ्काः कृताः सत्यूपलक्षणकृते मया ॥ २२ ॥
भूपपृष्टेन तेनाथ तन्नामोदीरितं निजम् ।
राज्ञाऽप्यानायितास्तेऽथ सङ्घाटाः श्वपचौकसः ॥ २३ ॥
द्विधा कृतेषु तेष्वन्तर्दृष्ट्वा तां धनदाभिधाम् ।
सद्यश्चुकोप मातङ्गवणिग्भ्यामवनीपतिः ॥ २४ ॥
हन्यमानौ च तौ मत्स्योदरेणैव विमोचितौ ।
सोऽथ कल्याणनीरेण स्नात्वा शुचिरभूत्पुनः ॥ २५ ॥
वणिग्[1]पार्श्वात् निजं वस्त्रादाय मातङ्गतोऽपि च ।
तयोः कृत्वोचितं चाभूद्धनदो धनदोपमः ॥ २६ ॥
पृष्टोऽथ भूभुजा भूयः स जगादात्मनः कथाम् ।
सत्यां यथाऽत्र वास्तव्यो देवाहं श्रेष्ठिनन्दनः ॥ २७ ॥
[2]गाथा मयैका दीनारसहस्रेणात्मसात्कृता ।
ततो निष्कासितः पित्रा ततो देशान्तरं गतः ॥ २८ ॥

---

(१) घ ङ ञ पार्श्वे ।
(२) च ज मया गाथैका । ग मयैका गाथा । च मयैकगाथा ।

इत्यादि सकलां वार्तां कथयित्वाऽब्रवीन्नृपम् ।
देवाद्यापि प्रकाश्योऽहं नावश्यं कस्यचिद्यतः ॥ २९ ॥
मम वित्तकलत्रापहारकार्यपरोऽपि चेत् ।
सार्थवाह इहायाति ततो भव्यं भवेत्तव ॥ ३० ॥
सार्थेशो देवदत्तोऽपि तत्रान्येद्युः समाययौ ।
सार्द्धं तिलकसुन्दर्या स आगाच्च नृपान्तिकम् ॥ ३१ ॥
ढौकयित्वा रत्नजातमुपविष्टो महीभुजा ।
अयं मल्योदरप्रोक्तो वणिगित्युपलक्षितः ॥ ३२ ॥
मल्योदरोऽपि तं दृष्ट्वा तथा तिलकसुन्दरीम् ।
जिज्ञासुस्तदभिप्रायं गोपिताङ्गोऽभवत् तदा ॥ ३३ ॥
आललापाथ भूपालः सार्थवाहं ससंभ्रमः ।
भद्र त्वं कुत आयासीः का चेयं बालिका वरा ॥ ३४ ॥
सोऽवोचत कटाहाख्यद्वीपादत्रागतोऽस्म्यहम् ।
इयं च जलधेरन्तर्द्वीपे लब्धा मयैककाः ॥ ३५ ॥
सुवस्त्राहारताम्बूलालङ्कारैः सत्कृताऽपि हि ।
राजंस्तवानुमत्यैव भवेन्मम गृहिण्यसौ ॥ ३६ ॥
राजा प्रोवाच हे सुभ्रु किं तेऽयं रोचते वरः ।
अथवा त्वामयं कामी बलादेव रिरंसते ॥ ३७ ॥
साऽवादीत्कोऽस्य पापस्य गृह्णीयादभिधामपि ।
गुणरत्ननिधिः[२] सिन्धौ प्रक्षिप्तो येन मे पतिः ॥ ३८ ॥

---

(१) ग घ ङ च ज -त्वाऽभवत् क्षणात् ।
(२) ग घ ङ च ज -खनिः ।

अनेन प्रार्थिता स्वामिन्नकार्यमिदमुत्तरम् ।
यतो राजप्रदत्ताऽहं भविष्यामि प्रिया तव ॥ ३९ ॥
निस्त्राणया मयैतस्मात् शीलमेवं हि रक्षितम् ।
अधुना तु करिष्यामि प्रवेशं ज्वलितानले ॥ ४० ॥
स्त्रीणामवश्यं साक्षी स्याद्भर्त्तुः सङ्गे हुताशनः ।
स एव शरणं तासां विरहे तस्य युज्यते ॥ ४१ ॥
भणिता भूभुजा सैवं मा कार्षीर्मृत्युसाहसम् ।
यतोऽहं दर्शयिष्यामि परिणीतपतिस्तव ॥ ४२ ॥
सोचे नरेन्द्र नो कर्त्तुं परिहासस्त्वयोचितः ।
क्वास्ति मे स धवो यो हि प्रक्षिप्तोऽगाधवारिधौ ॥ ४३ ॥
ततस्ताम्बूलदानार्थमुत्थाप्य धनदं नृपः ।
प्रोचे भद्रे स्वभर्त्तारमसुं दृष्ट्वा विलोकय ॥ ४४ ॥
तमालोक्योपलक्ष्यापि साऽसंभाव्यसमागमम् ।
यावदद्यापि नो हर्षप्रकर्षं तादृशं दधौ ॥ ४५ ॥
अवदद्धनदस्तावद्देवास्याः स पतिः स्फुटम् ।
यः शून्यागारसंस्थायाः कुतोऽप्यागादतर्कितः ॥ ४६ ॥
अनयैवार्पितो यस्य खड्गो रात्रसघातकृत् ।
रात्रसश्च हतो येनोढेयं चानुरागिणी ॥ ४७ ॥
इत्यादि सर्ववृत्तान्ते कथिते सति मूलतः ।
सूर्यालोकेऽब्जिनीवाभूत्सा सद्यो विकसन्मुखी ॥ ४८ ॥
जाता मत्स्योदरस्यैषा पुनर्जाया नृपाज्ञया ।
मार्यमाणश्च सार्थेशो नृपात्तेनैव मोचितः ॥ ४९ ॥

अनन्यसदृशं सर्वमलङ्कारादि वस्तु तत् ।
धनदो वणिजाऽऽनीतं दर्शयामास भूपतेः ॥ ५० ॥
कृतान्यकृत्यः सोऽन्येद्युरनुज्ञाप्य धराधिपम् ।
भूयसा परिवारेण प्रययौ पित्तमन्दिरम् ॥ ५१ ॥
राजमान्योऽयमित्यस्यासनादिस्वागतक्रियाम् ।
विधाय व्याजहारैवं रत्नसारोऽप्युदारधीः ॥ ५२ ॥
धन्योऽहं यस्य गेहे त्वमायासीर्नृपवल्लभः ।
तद्ब्रूहि वस्तु येनार्थः सर्वस्वमपि ते मम ॥ ५३ ॥
धनदोऽप्यवदत्तात सत्यमेतद्ब्रवीषि यत् ।
परं पृच्छाम्यहं किञ्चित्कारणेन गरीयसा ॥ ५४ ॥
यस्तेऽभूद्धनदो नाम तनयः क्व तु सोऽधुना ।
शुद्धिं जानासि तस्य त्वं काप्यसौ विद्यते न वा ॥ ५५ ॥
वचः श्रुत्वाऽस्य साकूतं सुताकारं च वीक्ष्य तम् ।
सुतोदन्तमथ श्रेष्ठी सवितर्कों न्यवेदयत् ॥ ५६ ॥
गाथा सुतेन दीनारसहस्रेणाददे मम ।
तदर्थे परुषं किञ्चिद्वचनं भणितो मया ॥ ५७ ॥
अभिमानवशात्क्वापि गृहान्निःसृत्य सोऽगमत् ।
गतस्याभूद्बहुः कालः शुद्धिं जानामि नास्य तत् ॥ ५८ ॥
आकृत्या वचसा चैवं मन्येऽहं त्वं स एव हि ।
त्वयि गोपयति स्वं च कुर्वे सन्देहमप्यहो ॥ ५९ ॥
सदृशा बहवो लोका दृश्यन्तेऽत्र महीतले ।
ततस्त्वमपि मत्पुत्रसदृक्षोऽपि भविष्यसि ॥ ६० ॥

धनदः स्माह हे तात स एवास्मि सुतस्तव ।
तस्यांघ्रौ दक्षिणे चिह्नं दृष्ट्वा ज्ञातोऽमुनाऽप्यसौ ॥ ६१ ॥
पितुः पादौ ननामायं गाढं सोऽप्यालिलिङ्ग तम् ।
हर्षाश्रुपूरपूर्णाक्षो जगाद च सगद्गदम् ॥ ६२ ॥
हा पुत्रागतनापि किं त्वयाऽऽत्मा निगूहितः ।
नोत्कण्ठा किमु ते पित्रोश्चिरान्मिलितयोरपि ॥ ६३ ॥
क्वास्थाः कालमियन्तं त्वमनुभूतं त्वया किमु ।
दुःखं सुखं वा हे वत्स देशान्तरगतेन हि ॥ ६४ ॥
धनदोऽप्यश्रुपूर्णाक्षः सङ्क्षेपादात्मनः कथाम् ।
पित्रोर्निवेदयामास क्षमयामास तौ तथा ॥ ६५ ॥
इदं चोवाच हे तात पार्थिवान्मां विमोचय ।
यथाऽहं तव वधूश्चागच्छावो निजमन्दिरम् ॥ ६६ ॥
गत्वा राजकुले सोऽथ तमर्थं निरमापयत् ।
सह पुत्रेण भूपालमप्याकारयति स्म च ॥ ६७ ॥
ततो गजेन्द्रमारूढो धनदः प्रेयसीयुतः ।
अनुगम्यमानो भूपेनागान्निजनिकेतनम् ॥ ६८ ॥
पुत्रे देशान्तरायाते गृहप्राप्ते च भूपतौ ।
हृष्टः प्रावर्त्तयत् श्रेष्ठी स महोत्सवमुत्तमम् ॥ ६९ ॥
अत्रान्तरे नृपसुतो नृपस्योत्सङ्गसंस्थितः ।
यावदासीन्मनस्तोषं जनयन्निजलीलया ॥ ७० ॥
तावदारामिकः कश्चिदुद्धृत्य स्वकरण्डकात् ।
कुसुमान्यार्पयद्राज्ञस्तनयस्तानि चाग्रहीत् ॥ ७१ ॥

तेषामन्तर्गतेनायं दष्टो राजाहिनाऽणुना ।
नाग्राग्रे [1]घ्राणमानोऽपि पूत्करोति ततश्च सः ॥ ७२ ॥
राजाऽपि पुष्पमध्यस्थं तं दृष्ट्वाऽहिं सुदुःखितः ।
प्रोचे गारुडिकं भद्र कुर्व्वेनं गतवेदनम् ॥ ७३ ॥
सोऽवादीद्राजसर्पोऽयं सर्वसर्पशिरोमणिः ।
तत्कर्त्तुं युज्यतेऽस्माकमत्र मन्त्रक्रिया नहि ॥ ७४ ॥
ततश्चक्रेश्वरीदत्तमणिनीरेण निर्विषम् ।
तं चक्रे धनदः सद्यो मुमुदे च महीपतिः ॥ ७५ ॥
ततः संमान्य धनदं समागत्य निजं गृहम् ।
नृपोऽप्यकारयद्वर्द्धापनं पुत्रस्य जन्मवत् ॥ ७६ ॥
अथासौ नृपतेः पुत्रः क्रमात्संप्राप्तयौवनः ।
निर्ययौ गजमारूढो राजपाटिकयाऽन्यदा ॥ ७७ ॥
पुरस्य पश्यता शोभां दृष्टा तेन मनोहरा ।
तनया शूरराजस्य श्रीषेणा नाम कन्यका ॥ ७८ ॥
निरीक्ष्योद्भटरूपां तां कुमारो मारपीडितः ।
बभूव सा च तं दृष्ट्वा नेषदप्यनुरागिणी ॥ ७९ ॥
कुमारो विरहे तस्या गृहे प्राप्तो रतिं गतः ।
मित्रैश्च तदभिप्रायो महीभर्तुर्निवेदितः ॥ ८० ॥
मन्त्रेश्वरः पार्थिवादिष्टो गत्वा शूरनृपान्तिकं ।
कुमारार्थं ययाचे तां श्रीषेणां वरकन्यकाम् ॥ ८१ ॥

---

(१) ग ङ च ट पूत्करोति स्म दष्टोऽस्मीति ततश्च सः ।

परमानुग्रहं सोऽथ मन्यमानोऽतिगौरवम् ।
चक्रे यावदमात्यस्य तावत्सा बालिकाऽवदत् ॥ ८२ ॥
यदि दास्यथ मां तस्मै यूयं तात तदा ध्रुवम् ।
आत्महत्यां करिष्यामि तच्छ्रुत्वा विषसाद सः ॥ ८३ ॥
ऊचे च सचिवं तावत् यात यूयं नृपान्तिकम् ।
कन्यकामनुनीयेमां कथयिष्याम्यहं पुनः ॥ ८४ ॥
मन्त्री गत्वा तदाचख्यौ राज्ञः शूरोऽपि कन्यकाम् ।
बभाण [1]सा तु श्रीषेणा नेच्छति स्मैव तं पतिम् ॥ ८५ ॥
तेनाथ पार्थिवस्येदं कथितं पार्थिवोऽपि तत् ।
सुतस्याख्यत्सोऽपि गाढं बभूव मदनातुरः ॥ ८६ ॥
अत्रान्तरे च संप्राप्तो धनदो राजसन्निधौ ।
पप्रच्छैवं महाराज यूयं चिन्तातुरा नु किम् ॥ ८७ ॥
राजाऽपि तनयावस्थास्वरूपं पर्यकीर्त्तयत् ।
तच्छ्रुत्वा श्रेष्ठिसूः स्माहालं विषादेन भूपते ॥ ८८ ॥
देवीचक्रेश्वरीदत्तमणिर्माहात्म्यतः क्षणात् ।
साधयिष्याम्यदःकार्यमित्युक्त्वा मणिमानयत् ॥ ८९ ॥
आर्पयच्च[2] कुमारस्याराधयामास सोऽपि तम् ।
धनदाख्यातविधिना तस्य तुष्टो मणिस्ततः ॥ ९० ॥
सा शूरनन्दनो तस्मिन्ननुरागं नृपात्मजे ।
दध्यौ तं च समीपस्थां सखीं स्निग्धमजिज्ञपत् ॥ ९१ ॥

---

(१) ग ङ च ट बहुधा सा तु ।
(२) घ ज स्व- ।

साऽऽचख्यौ तत्पितुः सोऽपि गत्वाऽशंसन्महीभुजः ।
राजाऽपि तनयस्याख्यत् ततः स्वस्थो बभूव सः ॥ ९२ ॥
सांवत्सरमथाकार्य्य विवाहदिनमुत्तमम् ।
राजाऽपृच्छत्स चाचख्यौ तद्वितीयदिने शुभम् ॥ ९३ ॥
लग्ने दोषोज्झिते तस्मिन् शुभग्रहनिरीक्षिते ।
शकुनैर्विहितोत्साहो विवाहः समभूत्तयोः ॥ ९४ ॥
स कुमारस्तया सार्द्धं भेजे वैषयिकं सुखम् ।
अथान्येद्युर्नृपस्योग्रा शिरःशूलव्यथाऽभवत् ॥ ९५ ॥
रोगापहारिसुमणेः प्रभावाद्वनदोऽपि ताम् ।
तत्पीडां शमयामास दुःसाध्यां भिषजामपि ॥ ९६ ॥
ततश्च पार्थिवो दध्यावस्माहो सदृशः पुमान् ।
नास्ति कोऽपि महीपीठे गुणरत्नमहोदधिः ॥ ९७ ॥
भाग्योदयेन केनापि सम्पन्नोऽयं सखा मम ।
इति ध्यात्वाऽधिकं मेने स्वसुतादपि तं सदा ॥ ९८ ॥
चतुर्ज्ञानधरः पद्भ्यां पवित्रितवसुन्धरः ।
आगात्तत्र पुरेऽन्येद्युः सूरिः शीलंधराभिधः ॥ ९९ ॥
जग्मुस्तद्वन्दनाहेतोः पौराः सर्वेऽपि भक्तितः ।
दृष्ट्वा तान् ज्ञातवृत्तान्तो रथस्थो धनदोऽप्यगात् ॥ ५०० ॥
कृत्वा नतिं यथास्थानमासीनेषु [१]जनेषु च ।
सूरिः शीलंधरः सोऽथ विदधे धर्मदेशनाम् ॥ १ ॥

---

(१) ग घ च ज धनादिषु ।

जीवानामिह संसारे विना धर्मेण नो सुखम् ।
त्यक्त्वा प्रमादं भो भव्यास्तद्धर्मे कुरुतादरम् ॥ २ ॥
कुर्वन् कलङ्क्येत् धर्मं मनसाऽप्यन्तरा हि यः ।
महणाक इवाप्नोति स सौख्यं दुःखमिश्रितम् ॥ ३ ॥
पप्रच्छ धनदः कोऽसौ भगवन्महणाभिधः ।
कुर्वताऽपि कथं तेन धर्मो नाम कलङ्कितः ॥ ४ ॥
सूरिः प्रोचेऽत्र भरते पुरे रत्नपुराभिधे ।
शुभदत्ताभिधः श्रेष्ठी वसति स्म महाधनः ॥ ५ ॥
भार्या वसुन्धरा तस्य महणाकश्च तत्सुतः ।
सोमश्रीर्नाम तस्यापि बभूव सहचारिणी ॥ ६ ॥
अन्यदा रथमारुह्योद्यानिकायां ययावसौ ।
उद्याने मण्डपस्तत्र 'विस्तीर्णश्च विनिर्मितः ॥ ७ ॥
खाद्य-भोज्य-लेह्य-पेय-भेदैस्तत्र चतुर्विधम् ।
बुभुजे स वराहारं मित्रैः सह यदृच्छया ॥ ८ ॥
ततस्ताम्बूलमादाय पञ्चसौगन्धिकं वरम् ।
क्षणं दृष्टिकृतानन्दं प्रेक्ष्य प्रेक्षणकं तथा ॥ ९ ॥
बहु पादपसङ्कीर्णं फलपुष्पर्द्धिबन्धुरम् ।
उद्यानमीक्षमाणोऽसौ ददर्शैकं महामुनिम् ॥ १० ॥(युग्मम्)
स मित्रप्रेरितो गत्वा ववन्दे तं तपोधनम् ।
सोऽपि ध्यानं विमुच्यास्मै धर्मलाभाशिषं ददौ ॥ ११ ॥

---

(१) ग घ ट ड सुविस्तीर्णश्च निर्मितः ।

तद्धर्मदेशनां श्रुत्वा प्रतिबुद्धा[1] स शुद्धधीः ।
सम्यक्त्वमूलं तत्पार्श्वे गृहिधर्ममुपाददे ॥ १२ ॥
पुनः साधुं नमस्कृत्य स गतो निजमन्दिरम् ।
द्रव्येण कारयामास जिनमन्दिरमुत्तमम् ॥ १३ ॥
पश्चाच्च चिन्तयामास बहुद्रव्यव्ययो मया ।
कृतो धर्मरसाधिक्यपराधीनतया कथम् ॥ १४ ॥
स एवं विगतोत्साहो भूत्वा कत्यपि वासरान् ।
ततो लोकानुरोधेनाकारयत्प्रतिमामपि ॥ १५ ॥
प्रतिष्ठां कारयामास तस्याश्च [2]श्वेतभिक्षुभिः ।
न्यवारयज्जीवमारिं ददौ दानं यथोचितम् ॥ १६ ॥
पुनर्दध्यावहो धर्मे बहुद्रव्यव्ययं व्यधाम् ।
उपार्जितधनात्तुर्यभाग एवात्र युज्यते ॥ १७ ॥
फलं भावि नवाऽस्येति सन्देहो मे प्रवर्त्तते ।
शास्त्रे च श्रूयते स्तोकव्ययस्यापि फलं महत् ॥ १८ ॥
स एवं संशयानोऽपि चक्रे पूजादिसत्क्रियाम् ।
अन्येद्युर्गृहमायातावपश्यच्च तपोधनौ ॥ १९ ॥
स्वयमेतौ शुभाहारैरुत्थाय प्रत्यलाभयत् ।
गतयोश्च तयोश्चिन्तां चक्रे धन्योऽहमित्यसौ ॥ २० ॥
निद्रान्तये च यामिन्यामन्यदाऽचिन्तयत्पुनः ।
अप्रत्यक्षफलेनेह कृतेन श्रेयसा हि किम् ॥ २१ ॥

---

(१) ग च ड -द्धः ।
(२) ग ङ च ड विधिपूर्वकम् ।

अपरेद्युर्मुनिद्वन्द्वं दृष्ट्वा मलमलीमसम् ।
स एवं चिन्तयामास धिगहो मलिनाविमौ ॥ २२ ॥
यद्येतै निर्मलं वेषमकरिष्यन्महर्षयः ।
ततोऽभविष्यत् किं नाम जैनधर्मस्य दूषणम् ॥ २३ ॥
अथवा हा मया दुष्टं चिन्तितं मुनिपुङ्गवाः ।
भवन्त्येवंविधा यस्मात्संयमेनैव निर्मलाः ॥ २४ ॥
एवं च शुभभावेन शुभं कर्म समार्जयत् ।
सोऽशुभेनाशुभं कर्मार्जयति स्मान्तराऽन्तरा ॥ २५ ॥
आयुःक्षये विपद्याभूत्स देवो भुवनाधिपः ।
ततश्युत्वा समुत्पन्नः स त्वं धनदनामकः ॥ २६ ॥
कृत्वा कृत्वाऽन्तरा धर्मो यत्त्वया दूषितस्तदा ।
सुखानि दुःखमिश्राणि लब्धानीह ततः स्फुटम् ॥ २७ ॥
तच्छ्रुत्वा मूर्च्छितः पृथ्व्यां पपात धनदः क्षणम् ।
जातिस्मृत्या निजं पूर्वभवभावं ददर्श च ॥ २८ ॥
उवाच च प्रभो सत्यं यद् युष्माभिः प्ररूपितम् ।
ततो बन्धूननुज्ञाप्य ग्रहीष्याम्यनगारताम् ॥ २९ ॥
इत्युदित्वा गृहे गत्वा पितरावेवमूचिवान् ।
हे अंब तात मां दीक्षाकृते विसृजतं युवाम् ॥ ३० ॥
ताभ्यां निवार्यमाणोऽपि न यावद्विरराम सः ।
तावत्तावूचतुर्दीक्षामादास्यावस्त्वया सह ॥ ३१ ॥
राज्ञः पार्श्वे ययौ सोऽथ स्वाभिप्रायं शशंस च ।
सोऽप्यूचेऽहमपि समं ग्रहीष्यामि व्रतं त्वया ॥ ३२ ॥

धनदः स्माह गार्हस्थ्ये मम स्वामी भवानभूत् ।
भविष्यति यतित्वेऽपि संयोगोऽयं मनःप्रियः ॥ ३३ ॥
ततो राज्ञा सुतो राज्ये स्थापितः कनकप्रभः ।
धनदस्य सुतः श्रेष्ठिपदे चैव धनावहः ॥ ३४ ॥
ततः सार्द्धं महीभर्त्रा पित्रभ्यां भार्यया तथा ।
उपाददे परिव्रज्यां धनदो गुरुसन्निधौ ॥ ३५ ॥
गृहीत्वा द्विविधां शिक्षां कृत्वा च विविधं तपः ।
मृत्वा सर्वेऽपि ते जग्मुः पुण्यात्मानः सुरालयम् ॥ ३६ ॥
ततश्च्युत्वा मनुष्यत्वं प्राप्य श्रमणतां तथा ।
क्षेत्रे महाविदेहे ते संप्राप्ताः परमं पदम् ॥ ३७ ॥

॥ इति मत्स्योदरकथा ॥

धनदस्य कथामेतां श्रुत्वा विद्याधराधिप ।
धर्मो निरन्तरं कार्यस्त्वयेत्यूचे मुनिः स तु ॥ ३८ ॥
तच्छ्रुत्वाऽमिततेजाः स गुर्वाज्ञां शिरसा दधत् ।
उत्थाय नमति स्माङ्घ्री भूयोऽपि मुनिवर्ययोः ॥ ३९ ॥
चारणश्रमणौ तौ च समुत्पत्य विहायसा ।
तपोमाहात्म्यसम्पन्नौ जग्मतुः स्वान[1]मीप्सितम् ॥ ४० ॥
नरखेचरराजौ श्रीविजयामिततेजसौ ।
गमयामासतुः कालं तावथौ धर्मतत्परौ ॥ ४१ ॥
तौ यात्रात्रितयं धन्यौ चक्रतुः प्रतिवत्सरम् ।
तत्र स्यात् शाश्वतं यात्राद्वयमेका त्वशाश्वती ॥ ४२ ॥

---

(१) च -मुत्तमम् ।

चैत्रस्य विमले पक्षे यात्रैका शाश्वती भवेत् ।
द्वितीया चाश्विनीमासे प्रसिद्धाऽष्टाह्निकाऽभिधा ॥ ४३ ॥
देवा विद्याधराश्चैते द्वीपे नन्दीश्वराभिधे ।
यात्रे कुर्युर्नराः स्वस्वस्थानचैत्येषु संमदात् ॥ ४४ ॥
तृतीयामपि तौ यात्रां चक्रतुः सीमपर्वते ।
बलर्षिकेवलोत्पत्तिस्थाने नाभेयमन्दिरे ॥ ४५ ॥
बह्वब्दसहस्राणि कृत्वा तौ राज्यमन्यदा ।
गत्वा मेरौ ववन्दाते सनातनजिनक्रमान् ॥ ४६ ॥
नन्दनाख्ये वने तत्र चारणश्रमणद्वयौ ।
विपुलमहामतिसंज्ञौ चोपविष्टावपश्यताम् ॥ ४७ ॥
नत्वा श्रुत्वा च तद्वाख्यां पृष्टौ ताभ्यामिमौ मुनी ।
भगवन्तौ कियदायुरावयोरिति कथ्यताम् ॥ ४८ ॥
षड्विंशतिर्दिनान्यायुः शेषमस्तीति जल्पितौ ।
ताभ्यां तावाकुलीभूतौ पुनरेवं जजल्पतुः ॥ ४९ ॥
विषयामिषगृद्धाभ्यां नेयत्कालं कृतं व्रतम् ।
संप्रत्यल्पायुषावावां करिष्यावो हहा किमु ॥ ५० ॥
मुनिभ्यां भणितावेतौ विनष्टं युवयोर्नु किम् ।
व्रतं गृहीतमद्यापि युवां स्वर्गापवर्गदम् ॥ ५१ ॥
ततः स्वस्वपुरं प्राप्तौ सुतौ राज्ये निधाय तौ ।
पार्श्वे जगृहतुर्दीक्षामभिनन्दनसन्मुनेः ॥ ५२ ॥

---

(१) ग ज ड -घौ सन्तौ ।

स्थितावनशनेनैतौ पादपोपगमेन च ।
सस्मार जनकस्यौजस्तदा श्रीविजयो मुनिः ॥ ५३ ॥
ततश्च तपसाऽनेन भूयासमहमप्यहो ।
पित्रा सम इति व्यक्तं निदानमकरोदसौ ॥ ५४ ॥
एवं कृतनिदानोऽसावन्योऽकृतनिदानकः ।
मृत्वा तौ प्राणते कल्पे समुत्पन्नौ महर्द्धिकौ ॥ ५५ ॥
विमाने नन्दिकावर्त्ते स्वस्तिकावर्त्तके तथा ।
दिव्यचूलमणिचूलाभिधानौ सुरसत्तमौ ॥ ५६ ॥ (युग्मम्)
तत्रादौ सुरकृत्यजातमखिलं कृत्वा स्थितेर्वेदिनौ
दिव्यं वैषयिकं ततः खलु सिषेवाते सुखं तौ मुदा ॥
कुर्वाणौ जिनचैत्यवन्दनविधिं यात्रां च नन्दीश्वरे
गाढं चक्रतुरुज्ज्वलं शुभमतौ सम्यक्त्वरत्नं निजम् ॥ ५५७ ॥

इत्याचार्यश्रीअजितप्रभविरचिते श्रीशान्तिनाथचरित्रे
चतुर्थपञ्चमभववर्णनो नाम द्वितीयः प्रस्तावः ॥

तृतीयः प्रस्तावः ।

इतोऽस्य जम्बूद्वीपस्य पूर्वविदेहमध्यगे ।
विजये रमणीयाख्ये सुभगायां महापुरि ॥ १ ॥
वृत्तगाम्भीर्य्यमर्य्यादास्थैर्यगुणैर्जितसागरः ।
प्रौढप्रतापयुक्तोऽभूत् राजा स्तिमितसागरः ॥ २ ॥ (युग्मम्)
भार्या वसुन्धरी तस्यानर्घ्यशीलवसुन्धरा ।
द्वितीयाऽनुद्धरी नाम बभूव स्त्रीगुणाञ्चिता ॥ ३ ॥
दिव्यचूलः सुरः सोऽथ च्युत्वा प्राणतकल्पतः ।
राज्ञः पत्न्या वसुन्धर्या उदरे समवातरत् ॥ ४ ॥
गजपद्मसरश्चन्द्रवृषस्वप्नास्तया तदा ।
चत्वारो हलभृज्जन्मसूचका वीक्षिताः शुभाः ॥ ५ ॥
समये सुषुवे साऽथ तनयं कनकप्रभम् ।
अपराजित इत्याख्यां चक्रे तस्य पिता शुभम् ॥ ६ ॥
अन्यदाऽनुद्धरीकुक्षौ सरसीव सितच्छदः ।
समुत्पन्नः सुतत्वेन मणिचूलो दिवश्च्युतः ॥ ७ ॥
सिंहार्ककुम्भसिन्ध्वश्वीरत्नोच्चयहुताशनान् ।
प्रविशतो मुखेऽद्राक्षीत् सप्त स्वप्नानसौ तदा ॥ ८ ॥
कथयामास तान् भर्तुः सोऽपि पप्रच्छ तद्विदम् ।
सोऽवदत्ते सुतो विष्णुर्भावी स्वप्नैरिमैर्नृप ॥ ९ ॥

अग्रेतनसुतश्चायं बलभद्रो भविष्यति ।
इत्युक्त्वाऽगात् गृहे राज्ञा विसृष्टः स्वप्नपाठकः ॥ १० ॥
समये सुषुवे साऽपि देवी कृष्णप्रभं सुतम् ।
अनन्तवीर्य इत्याख्या पित्रा तस्य विनिर्ममे ॥ ११ ॥
काले कृतकलाभ्यासौ रूपलावण्यशालिनौ ।
उद्यौवनौ कुमारौ तौ पित्रा कन्ये विवाहितौ ॥ १२ ॥
अन्येद्युस्तत्पुरोद्याने विशिष्टज्ञानसंयुतः ।
स्वयंप्रभो नाम मुनिरागत्य समवासरत् ॥ १३ ॥
इतोऽश्ववाहनां कृत्वा परिश्रान्तः स भूपतिः ।
विश्रामार्थं तमुद्यानमाययौ नन्दनोपमम् ॥ १४ ॥
[1]क्षणमेकं स विश्रान्तस्तत्राशोकतरोस्तले ।
ददर्श मुनिवर्यं तं ध्यानाचलकलेवरम् ॥ १५ ॥
तं त्रिःप्रदक्षिणीकृत्य नमस्कृत्य च भक्तितः ।
निषद्य च यथास्थानं स शुश्रावेति देशनाम् ॥ १६ ॥
कषायाः कटवो वृक्षा दुर्ध्यानं तत्प्रसूनकम् ।
फलं च पापकर्मेह परलोके च दुर्गतिः ॥ १७ ॥
संसारोद्विग्नचित्तेन निर्वाणसुखमिच्छुना ।
कषायाः परिहर्त्तव्यास्तदेतेऽनर्थकारणम् ॥ १८ ॥
अथोचे पार्थिवः सत्यं महात्मन्निदमेव हि ।
परमेवं ममाख्याहि कतिभेदा भवन्ति ते ॥ १९ ॥

---

(१) ख घ च क्षणमेकं शयितस्तत्राशोकस्य तरोस्तले ।

मुनिर्जगौ कोप-मान-माया-लोभाभिधा इमे ।
चत्वारः स्युस्तथाऽमीषां भेदाः प्रत्येकशोऽप्यमी ॥ २० ॥
आद्योऽनन्तानुबन्ध्यत्राप्रत्याख्यानो द्वितीयकः ।
प्रत्याख्यानस्तृतीयस्तु तुर्यः संज्वलनाभिधः ॥ २१ ॥
निश्चलोऽचलरेखेव दारुणो दुःखदायकः ।
भवेत्तत्रादिमो राजन् कोपोऽनन्ताऽनुबन्धकः ॥ २२ ॥
पृथ्वीरेखासमोऽप्रत्याख्यानो नाम्ना द्वितीयकः ।
प्रत्याख्यानस्तृतीयस्तु रेणुरेखासमो मतः ॥ २३ ॥
तुर्यः संज्वलनो नीररेखातुल्यः प्रकीर्त्तितः ।
एवं मानोऽद्रास्थिकाष्ठतृणसस्तम्भसन्निभः ॥ २४ ॥
माया वंशीमेषशृङ्गगवांमूत्रावलेहवत् ।
लोभः कृमिरागपङ्काञ्जनहारिद्ररागवत् ॥ २५ ॥
जन्मवर्षचतुर्मासीस्थितयः स्युः क्रमात्त्रयः ।
तुर्यः पक्षस्थितिस्ते च स्वभ्रादिगतिहेतवः ॥ २६ ॥
एवं कषायास्ते राजन् षोडशापि प्रकीर्त्तिताः ।
गाढसंरम्भविहिताः स्युर्यके गाढदुःखदाः ॥ २७ ॥
संरम्भेण विना स्तोकभवान् दुःखं ददत्यलम् ।
ततश्चाल्पेऽपि नो कार्याः कषाया नृपते त्वया ॥ २८ ॥
राजन्नल्पीयसोऽपि स्यात् दुष्कृतस्य फलं महत् ।
मित्रानन्दादिसत्त्वानां यथादृष्टं मनीषिभिः ॥ २९ ॥
मित्रानन्दादयः केऽमी इत्युक्तो भूभुजा पुनः ।
स्वयंप्रभमुनिः स्माह तत्कथा श्रूयतामिति ॥ ३० ॥

सुरसद्मसमानर्द्धि नानाऽद्भुतमनोहरम् ।
अस्तीहामरतिलकं नगरं भुवि विश्रुतम् ॥ ३१ ॥
रूपलक्ष्माऽतिशायिन्याऽभिभूतमकरध्वजः ।
मकरध्वजनामाऽभूत् भूपतिस्तत्र विक्रमी ॥ ३२ ॥
पत्न्यां मदनसेनायां पद्मकेसरनामकः ।
तस्य पद्मसरःस्वप्नसूचितस्तनयोऽभवत् ॥ ३३ ॥
राज्ञः पत्न्या तयाऽन्येद्युर्विद्दखत्या शिरोरुहान् ।
विलोक्य पलितं दूत आगाद्देवेति जल्पितम् ॥ ३४ ॥
ततः संभ्रान्तचित्तस्य कुर्वाणस्य दिगीक्षणम् ।
भूयः पत्युस्तयाऽऽख्यातं पाण्डुकेशं प्रदर्शितम् ॥ ३५ ॥
दूतोऽयं धर्मराजेन प्रेषितः पलितच्छलात् ।
आगच्छति जराकृत्यं कुरुष्वेति वदन्निव ॥ ३६ ॥
ततश्च पार्थिवो दध्यौ मम पूर्वैर्महात्मभिः ।
अदृष्टपलितैरेव धर्मसेवा व्यधीयत ॥ ३७ ॥
धिग् मां राज्यलुब्धं तु [1]स्थितिविच्छेदकारिणम् ।
यस्य मे विषयासक्तस्यैव जातो जरागमः ॥ ३८ ॥
इति चिन्ताविषण्णास्यं पतिं दृष्ट्वा सनर्मवाक् ।
उवाचैवं पुना राज्ञी तद्भावाविदुरा सती ॥ ३९ ॥
नाथ त्वं वृद्धभावेन लज्जसे यदि सर्वथा ।
ततोऽहं कारयिष्यामि पटहोद्घोषणामिमाम् ॥ ४० ॥

---

(१) ख घ च मति-।

यः कश्चिदवनीनाथं जातयामं वदिष्यति ।
भविष्यति सकोऽवश्यमकालेऽपि यमातिथिः ॥ ४१ ॥
राजा प्रोवाच हे देवि किं ब्रवीष्यविवेकिवत् ।
जरैव मण्डनं यस्माज्ज्ञवेदस्मादृशां किल ॥ ४२ ॥
तर्हि श्यामसुखा यूयं किमित्युक्ते तया पुनः ।
स तस्याः कथयामास स्वस्य वैराग्यकारणम् ॥ ४३ ॥
ततश्च तनयं राज्ये संस्थाप्य प्रियया सह ।
तापसीभूय राजाऽसौ वनवासमशिश्रियत् ॥ ४४ ॥
गूढगर्भा तु सा राज्ञी प्रपन्ना तापसव्रतम् ।
वर्द्धमाने तु गर्भेऽस्या अवर्द्धिष्टोदरं क्रमात् ॥ ४५ ॥
किमेतदिति दृष्ट्वा च साऽऽचख्यौ तथ्यातथ्यम् ।
पत्युः कुलपतेः सोऽपि व्रतदूषणभीरुकः ॥ ४६ ॥
तापसीभिः पाल्यमाना समये सुषुवेऽथ सा ।
सुतं देवकुमाराभं शुभलक्षणशोभितम् ॥ ४७ ॥
तस्याश्चानुचिताहाराद्रोगोऽभूद्दारुणस्तनौ ।
अचिन्तयंश्च दुःखार्त्तास्ते [1]तपोधनतापसाः ॥ ४८ ॥
गृहिणामपि दुष्पालो बालः स्याज्जननीमृते ।
तन्मातरि विपन्नायां कथं पाल्योऽयमर्भकः ॥ ४९ ॥
वणिग्गुर्ज्जयिनीपुर्यां वाणिज्येन परिभ्रमन् ।
तदा तत्रायया देवधराख्यो दैवयोगतः ॥ ५० ॥

---

(१) ख घ च तपोवन-।

सोऽथ तापसभक्तत्वात् तान् प्रणम्य तपस्विनः ।
दृष्ट्वा चिन्तातुरांश्चैतान् पप्रच्छोद्वेगकारणम् ॥ ५१ ॥
ऊचे कुलपतिः सोऽयमस्मद्दुःखेन दूयसे ।
तदाऽमुं बालकं श्रेष्ठिन्नस्मद्दत्तं गृहाण भोः ॥ ५२ ॥
ततस्तेन गृहीत्वाऽयं स्वभार्यायाः समर्पितः ।
देवसेनाभिधानायाः प्रसूतायाः सुतां पुरा ॥ ५३ ॥
देवी मदनसेना सा स्थानप्राप्तं विलोक्य तम् ।
जातचित्तसमाधाना रोगार्त्त्या संस्थिता तया ॥ ५४ ॥
गृहं गतेन तेनाथ श्रेष्ठिनोत्सवपूर्वकम् ।
तनयस्यामरदत्त इति नाम विनिर्ममे ॥ ५५ ॥
सुरसुन्दरीति पुत्रापत्यमूच्च जनश्रुतिः ।
प्रसूताऽपत्ययुगलं पत्नी देवधरस्य यत् ॥ ५६ ॥
सागरश्रेष्ठिनः पुत्रो मित्रश्रीकुक्षिसम्भवः ।
संजज्ञेऽमरदत्तस्य मित्रानन्दाभिधः सुहृत् ॥ ५७ ॥
समहर्षशुचोर्नित्यं समजागरनिद्रयोः ।
तयोः प्रवहते मैत्री नेत्रयोरिव धन्ययोः ॥ ५८ ॥
जीमूतेभघटाशाली हरिरावविराजितः ।
क्षणिकासिलताधारी गर्जाभभ्भारवोद्भरः ॥ ५९ ॥
केकिचक्रप्रियालापग्राम्यस्त्रीगीतमङ्गलः ।
प्रावर्त्तत धराप्रेयानृतुराट् प्रावृडन्यदा ॥ ६० ॥ (युग्मम्)
तस्मिन् काले च तौ सिप्रासैकते वटसन्निधौ ।
क्रीडयोन्नतिकानाम्ना रेमाते सुहृदौ मुदा ॥ ६१ ॥

*Mīmāṁsā Darçana, Fasc. 6–19 @ /10/ each	Rs.	8	12
Nyāyavārtika, Fasc. 1–6 @ /10/ each		3	12
*Nirukta, Vol. IV, Fasc. 1–8 @ /10/ each		5	0
*Nitisara, Fasc. 2-5 @ /10/ each		2	8
Nityācārapaddhatiḥ, Fasc. 1–7 @ /10/ each		4	6
Nityācārapradīpaḥ Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1. @ /10/ each ...		5	10
Nyayabinḍuṭīkā, Fasc. 1 @ /10/ each		0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2–6 ; Vol. II, Fasc. 1–3 @ /10/ each		5	0
Padumawati, Fasc. 1–5 @ 2/		10	0
Pariçiṣṭa Parvan, Fasc. 3–5 @ /10/ each		1	14
Prākrita-Paingalam, Fasc. 1–7 @ /10/ each		4	6
Prithivirāj Rāsa. Part II, Fasc. 1–5 @ /10/ each		3	2
Ditto (English) Part II, Fasc. 1 @ 1/-		1	0
Prākṛta Lakṣaṇam Fasc. 1 @ 1/8/ each		1	8
Parāçara Smṛti, Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1–6 ; Vol. III, Fasc. 1–6 @ /10/ each		12	8
Parāçara, Institutes of (English) @ 1/- each		1	0
Prabandhacintāmaṇi (English) Fasc. 1–3 @ 1/4/ each		3	12
Saddarsana-Samuccaya, Fasc. 1-4 @ /10/ each		1	4
*Sāma Vēda Saṁhitā, Vols. I, Fasc. 7–10 ; II, 1-6 ; III, 1–7 ; IV, 1–6 ; V, 1–8, @ /10/ each.		19	6
Sāṇkhya Sūtra Vṛtti, Fasc. 1–4 @ /10/ each		2	8
Ditto (English) Fasc. 1–3 @ 1/- each		3	0
•Sankara Vejaya, Fasc. 2-3 @ /10/ each		1	4
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each		3	12
Sragdharā stotra (Sanskrit and Tibetan)		2	0
Srauta Sutra Latyayan, Fasc. 1-9 @ /10/ each		5	10
„ „ .. Asbalayana, Fasc. 4-11 @ /10/ each		5	0
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ 1/- each		1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each		2	8
*Taittreya Brahmana, Fasc. 6-25 @ /10/ each		12	8
„ (Pratisakhya, Fasc. 1-3 @ /10/ each		1	14
*Taitterīya Saṁhitā, Fasc. 27–45 @ /10/ each		11	14
Tāṇḍya Brāhmaṇa, Fasc. 7–19 @ /10/ each		6	14
Tantra Vārteka (English) Fasc. 1-6 @ 1/4/ each		7	8
Tattva Cintāmaṇi, Vol. I, Fasc. 1–9, Vol II, Fasc. 2–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each		23	12
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each		1	14
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each		1	14
Tul'si Satsai, Fasc. 1–5 @ /10/ each		3	2
Upamita-bhava-prapañca-kathā, Fasc. 1-11 @ /10/ each		6	14
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ 1/- each		6	0
Vallāla Carita, Fasc 1 @ /10/		0	10
Varṣa Kriyā Kaumudī, Fasc 1–6 @ /10/ each		3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3–6 ; Vol. II, Fasc. 1–7, @ /10/ each ...		6	14
Vidhāna Pārijata, Fasc. 1–8 Vol- II. Fasc. I @ /10/ each		5	10
Vivādaratnākara, Fasc. 1–7 @ /10/ each		4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1–6 @ /10/ each		3	12
*Yoga Aphorisms of Patanjali, Fasc. 3–5 @ /10/ each		1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1. (200 pages.)		1	4

Tibetan Series.

Pag-Sam Ṭhi S'iṅ, Fasc. 1–4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6, @ 1/ each		14	0
Rtogs *brjod dpag ḥkhri S'iṅ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1–6 ; Vol. II. Fasc. 1–5 @ 1/ each		11	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /10/ each		8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1–3 @ 1/- each		3	0
Āiu-i-Akbarī, Fasc. 1-22 @ 1/8/ each		33	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 2/- each		34	0
Akbarnāmah, with Index, Fasc. 1–37 @ 1/8/ each		55	8
Ditto (English) Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1-4 @ 1/4/ each		15	0
Arabic Bibliography, by Dr. A. Sprenger, @ /10/		0	10
*Bādshāhnāmah, with Index, Fasc. 1–19 @ /10/ each		11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each		5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each		2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each		31	8
Farhang-i-Rashīdī, Fasc. 1–14 @ 1/8/ each		21	0

•The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Futūḥ-ush-Shām of Wāqidī, Fasc. 1–9 @ /10/ each	5	10
Ditto of Āzādi, Fasc. 1–4 @ /10/ each	2	8
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ 1/4/ each	7	8
Iqbālnāmah-i-Jahāngirī, Fasc. 1–3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-' Ālamgirī, Fasc. 1–6 @ /10/ each	3	12
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1–5 @ /10/ each	3	2
Muntakhabu-t-Tawārikh, Fasc. 1–15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each	15	0
Muntakhabu-l-Lubāb, Fasc. 1–19 @ /10/ each	11	14
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmi's Khiradnāmah-i-Iskandari, Fasc. 1–2 @ /12/ each	1	8
Riyāẓu-s-Salātīn, Fasc. 1–5 @ /10/ each	3	2
Ditto (English) Fasc. 1–5 @ 1/	5	0
Tabaqūt-i-Nāṣirī, Fasc. 1–5 @ /10/ each	3	2
Ditto (English) Fasc. 1–14 @ 1/ each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīm Barni Fasc. 1–7 @ /10/ each ...	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1–6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1–2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1 @ 1/	1	0
Wis-o-Rāmin, Fasc. 1–5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vols. XIX and XX @ 10/ each	20	
2.	Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No.		
3.	Journal of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.		
4.	Journal and Proceedings, N. S., 1905, to date, @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.		
5.	Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.		
6.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, 1884. ...	3	8
8.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
9.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
10.	Tibetan Dictionary, by Csoma de Körös	10	0
11.	Ditto Grammar ,, ,, ...	8	0
12.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
13.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
14.	Memoir on maps illustrating the Ancient Geography of Kasmir, by M. A. Stein Ph.D., JI. Extra No. 2 of 1899	4	0
15.	Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ...	10	0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each	34	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

22-1-09.

Books are supplied by V. P. P.

BL
1373
S45A6
1909
v.1

Ajita Prabhācārya
Shāntināthacaritram

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 15 02 15 07 019 2